११८

नं० १००३-घ

भागवते दशमस्कन्धे रासक्रीडा पंचाध्यायी सटीका

नं० १००३-घ

श्री·टी० १

श्रीगणेशायनमः श्रीयुक्तबादरायणिरुवाचेति वदरिकाश्रमेमहातपश्चरणाद्भगवान् श्रीव्यासो
बादरायणः तस्यतपःफलरूपःपुत्रइतिसर्वज्ञत्वश्रीभगवत्प्रेमरसमयत्वादिकंध्वनितं तेनोक्तत्वा
दस्याख्यानस्यसर्वथासाधनसाध्यत्वंप्रौढानुरागमयत्वंचाभिप्रेतंततोभक्त्यैनश्रोतव्यमिति
भावः इदानींश्रीव्रजसुंदरीणांमनोभिलाषपरिपूरणद्वाराप्रेमरसविस्तारणरूपंतदवतारमुख्य
तत्प्रयोजनंदर्शयन् ताभिःसहविहरणमेवतस्यसर्वोतिशायेसुखमितिचप्रकटयन् तत्रचा
धराम्रतपानादिनासुदृशामेवश्रीभगवद्रूपादिमाधुरीविशेषानुभवात् प्रेमविशेषविस्तारस्तुसि
द्धीनयोग्याभिः सहरासक्रीडायं चप्राणतुल्यपंचाध्यायावर्णयन् आदौतत्सामग्रीदर्शयन्
तत्रचश्रीव्रजदेवीवर्गाकर्षणंकथयन् तद्धेतुत्वेश्रीभगवतोभावविशेषप्राकट्यमाह भगवानिति १

एषचक्रीडातदुचितकालेकैशोरेज्ञेया तथाचोक्तं पुराणे सोपिकैशोरकवयो मानयन्मधुसूदनः॥
रेमेताभिरमेयात्मा क्षपासुक्षपिताहितः इति इति श्रीहरिवंशेच युवतीगोपकन्याच रात्रौसंकल्प
कालवित् कैशोरकं मानयानःसहताभिर्मुमोदहेति तत्ररासारंभेतस्यसौंदर्यादिविशेषस्मरणे
नपरममोहनत्वात् श्रीबादरायणिना ततश्चपौगंडवयःश्रितौव्रजेइत्यादिवद्यद्यत्रैवकुंतशब्दे
क्रीडासाचसमयमेवकैशोरंव्याप्येत्यादिकंसर्वमग्रेयथास्थानंविवरणीयं तत्रोपलक्षणार्थंकै
(शोरंव्याप्येत्यादिसर्वमग्रेयथास्थानंविवरणीयं) तत्रोपलक्षणार्थंकैशोरारंभप्रथमैकरात्रक्री
डेयमुच्यते॥ ॥भगवानपिताराञीःशारदोत्फुल्लमल्लिकाः वीक्ष्यरंतुंमनश्चक्रेयोगमायामुपा
श्रितः १ रासक्रीडायांनिजाशेषभगवत्तासारप्रकटनाभिप्रायेण नंदादयःपरमानंदनिर्दे

ताबभूत्वु: भगवानपिस्वयं परमानंद निर्वृतोभवितुं शेन्तुं क्रीडाविशेषं कर्त्तुं मनश्चक्रे ऐक्षदिति
अपिशब्दार्थ: बहुवचनत्वाराञ्चीरिति नैर्व्यंजितार्थमेव यद्वानुताश्च निर्वचनीया: सर्वकालत:
श्री॰टी॰ श्रेष्ठतरा: परमानंदरसमयीसत्क्रीडायोग्या इत्यर्थ: बहुवचनेतु बह्वीषु रात्रिष्वेव सा क्रीडा वोध्यते
२ तच्चांते सविशेषंव्यक्तंभाति शारदात्वात् उच्चै: फुल्लाविकसिता मल्लिकायासुता: यद्यपिसर्वत्रा स॰
2 श्रये श्रीवृंदावने सदा सर्वपुष्पाण्युद्भवंति विशेषतश्च शरदि जातीकुमुदकमलादीन्यपि विकसंति
तथाप्युत्फुल्लमल्लिका इति रात्रिविषयकविकार विशेषाभिप्रायेण एवमग्रेपिकुमुद्वंतामिति
इत्युद्दीपनमिति वीत्यस्यालोच्य योगमाया पराख्यसच्चिदानंदशक्तिविशेष: तामुपकरणत्वे
नश्राश्रित: प्रकटितवान् सन् इति सर्वलीलानो विशेषेण रासक्रीडाया: परमानंदविशेषादिस्व २

तद्युक्तो मायादया । माया दंभेऽक्षपायां चेति विश्वः । तामुपाश्रित । रासक्रीडया ... १२

रूपत्वमभिप्रेतं सर्वस्यापि लीलायाः सच्चिदानंदरूपत्वं प्रागष्टमध्याये बाल्यलीलायां
विवृतमेवास्ति यद्वा योगऐश्वर्यैकरूपां विस्तारितवानित्यर्थः यद्वा अपि शब्दस्यैवात्रान्वयः यो
गआत्मारामत्वात् मायाआवरणात्मिका कापट्यं वा योगयुक्तो मायाउपसमीप्येन नित्यमाश्रि
तोपि इति तदानीं सोयो मायावानित्यर्थः किंतु निजपादाब्जप्रेमसंपद्विस्ताररूपसत्यस्वभावो
व्यक्तोभूदित्यर्थः यद्वा योगे संयोगे या माया यत्नपत्नीष्विव वंचना तामुपाश्रितोपि इति तदा
नीं तस्य संगमे मायानिष्पन्नेत्यर्थः सर्वाभिरेव व्रजसुंदरीभिः सहसा तात्संयोगविशेषसिद्धेः सि
द्धिं गताभिरपि तस्याप्तेः यद्वा युनक्ति नित्यं वहति संयोगप्राप्तो नीति योगा या माया लक्ष्मीस्तस्या
नित्यं वर्तमानः तया सदा सेव्यमानोपीत्यर्थः इति रासक्रीडालयानसंपद्येन तद्दुर्लभाचेत्या

यभिप्रेतं यद्वा योगाय संयोगाय समाय: शक्तिर्यस्या: सा योगमाया वं श्रीमाङ्गमाने शक्तिश्चैतन्यस्य घटि
रूपं तामुपाश्रित: यद्वा योगस्य संभोगस्य मायो मानं पर्य्याप्तिर्यस्या: सा योगमाया श्रीराधिका २
अथवा योगस्य संभोगस्य मा लक्ष्मी: संपत्तिरिति यावत् तां याति प्राप्नोतीति योगमाया श्रीराधे
श्री·द० वतामनस उपाश्रित: रासक्रीडायास्तद्धेतुकत्वात् तत्त्वाग्रे प्रसिद्धमेव एवं निजरिरंसया
२ चंद्रमपि प्राचीदिशा सह प्रियये वरंतुमुद्यतं मन्यमानस्य श्रीभगवतो भावमभिव्यंजयन्नि
3 व तद्रिरंसासमरणेनोदितभावविशेषप्राचीदिशानायिकया सह चंद्रस्य नायकभावप्रदर्शने
नोदयमाह ॥ ॥ तदोडुराज: ककुभ: करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमै: सचर्षणीनामुद
गाच्छुचो मृजन् प्रिय: प्रियाया इव दीर्घदर्शन: २ यदा मनश्चक्रे तदानीमेव उडूनां तारका २
ना

का

णं राजेतिना अपि तत्परिचारकत्वेनोदगुरिति ध्वनितं तासां च पूर्णचंद्रराजावल्यप्रकाशना
विवक्षया परिकस्यापेक्षया च उदयस्य गौणत्वयोक्तिः विशेषेण लिपन्निति पूर्णचंद्राभिप्रा
येणैव पूर्णत्वं च तस्य पूर्णमास्यां किंच तथाविनापितिथ्यंतरे भगवद्भिरंसापेक्षया शंतमैरमृ
तमयैरित्यर्थः सर्वतापापहारित्वात् सः कार्मांबुराशिपरिवर्द्धनतया प्रसिद्धः न केवलमेवम
मुनाप्राचीदिशएव तापोऽहृतः किंतु सर्वेषां जनानामपीत्याह चर्षणीनामिति शुचः शरदर्कजसं
तापः दुःखानि एतच्च श्रीभगवतो रिरंसोद्दीपनद्वारा प्रयोगोपकन्यावर्गचिरविरहतापापनो
दनाभिप्रायेण जगत्सृज्यानां तासां शुगपनोदनेन जगतामेव स्वतः शुगपनोदनसिद्धेः प्रियःप्रि
यायाः इवेति स रागात्त साधुत्वानन्यत्वादिना स्वीयं रुचिविशेषोद्दर्शितः अत एव शोकाश्रूणि

मार्ज्जयन् यथासौ परमसुखकरेणलिंपति दीर्घदर्शन इत्याऽनेनपरमौत्कंठ्यं सूचितं एवंस
र्वमिदं श्रीभगवद्रिंसाविभावनमूह्यं ततश्चभावाविशेषाविर्भावेन श्रीगोपीनामाकर्षणार्थंमो
हनमंत्रमिववेणुनाकिंचिज्जीतमगायदित्याह २ दृष्ट्वाकुमुद्वंतमखंडमंडलंरमाननाभंनवकुंकुमा
श्री·द रुणं वनंचतत्कोमलगोभिरंजितंजगौकलंवामदृशांमनोहरं ३ २ कुमुत् कुमुदं तथाचविश्वः
४ कुमुदेपि कुमुत् प्रोक्तमिति तद्वंतमिति कुमुदानि चतदानीं विकसितानीत्यर्थः अतएववक्ष्य
५ ते श्रीगोपीभिः वृंदावने कुमुदकुंदशशांकरम्येइति यद्वा कुः पृथ्वी तस्यामुत् हर्षः तद्वंतमिति
तदुदयेन सर्वेषामेवानंदोभूदित्यर्थः तत्र हेतवः अखंडेत्यादीति अखंडमंडलत्वाद्रमाननाभ
इति लक्ष्मीमुखस्मारणेन रिरंसाविभाविते ति ज्ञेयं यद्वा रमयतीति रमा श्रीराधा तनुरमान ४

नं सदा कुंकुमाक्ततया रंजितं चंद्रस्तु शुक्ल एव नन्वकथं तस्यादृश्यं तत्राह नवेति एतत्प्रथ
मोदयमात्रविवक्षया नवकुंकुमस्य भावोद्दीपनत्वेनैव प्रयोगः एवं कालस्यातियोग्यतां प्रद
र्श्य स्थानस्यापि प्रदर्शयति वनं चेति तस्य चंद्रस्य कोमलैः प्रथमोदये नाल्पमात्रप्रकाशवद्भिः
गोभिरभिनो रंजितं रक्तीकृतं अनुरागविषयीकृतं वा यद्वा गोभिरिति तृतीयांतपदं रंजितमि
त्तिनं अत्रापि स एवार्थः एवं भावोद्दीपनमेव दर्शितं कलं मधुरं किंचिद्गीतं यद्वा कलं यथा
स्यात्तथा व्रजगोवेणुनेति ज्ञेयं कात्स्न्र्यं गते कलपदाश्च नवेणुगीतेत्यादि वक्ष्यमाणत्वात् वामा
मनोहराः दृशो नेत्राणि यासां परमसुंदरीणामित्यर्थः यद्वा वामाः कुटिलाः दृक्छ्रियो यासां प
रमविदग्धानामित्यर्थः एतत्स्वरूपनिरूपणमात्रं व्रजांगनानां सर्वासामेव स्वभावतस्ता

दृशत्वात् मनोहरनिस्वाकर्षीति संकेतशिशोजेण रणगतीलादिविशेषेण वाम नोहरं तद्यथा
स्यात् इति दिक् तनपेक्षया: तदानीं गानविशेषाभिप्रेत: दिनान्तरेषु वेणुगीमेन ताद्दृशत्वा
द्दृते: ॥ निशम्य गीतं तदनंगवर्द्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः आजग्मुरन्योन्यमल
श्री ह॰ क्षितोद्यमाः सयत्र कांतोजवलोलकुंडलाः ४ तत्र वैणुं चकारं श्रीकृष्णवेणुगीतं अनंगं श्रीभ
५ गवद्विषयं कामं प्रागवर्त्तमानमेवाधुनावर्द्धयतीति तथा तत् यद्यपि वा मद्दृशां मनोहरत्व
5 नेन तां गवर्द्धनत्वमायातमेव तथापीयं विशेषोक्तिस्तदतिशयविवक्षया अनंगशब्दप्रयोग
श्वतासां प्रेमरूपकामविशेषण ग्राम्यधर्महेतुप्राकृतकामांशाभावविवक्षयाः यद्वा श्रीभगव
द्विषयत्वे नानंगस्यासिसांगीभावाद्याभिप्रायेणेतिदिक् व्रजस्य व्रजे यायाः स्त्रियो तवधुव ५

त्यक्ताः कृष्णेन परमाकर्षणेन सर्वमेव गृहीतं आकृष्टं माविष्टं माविष्टं वा मानसंभ्रमेन संमन
स्कन्दीयाशेषं वा यासां ताः विशेषतस्तदानीं तादृशं गीतं श्रुत्वा आजग्मुः यद्वा स्वयूथे मिथः स
ख्यवतीनामपि तासामन्योन्यमलक्षितोद्यमत्वे हेतुः कृष्णेति तदानीं कृष्णाकृष्टचित्तत्वेन वि
चारोपगमादिति भावः यद्वा तेनैव प्रेमविशेषस्वाभाविकत्वद्विलासात्मकसापत्न्यस्पर्धान्तरप्रा
दुर्भावात् यद्वागमनेऽन्यं तत्त्वरया तज्ज्ञापनाशंकेः अत एव व्रजवेन गमनवेगेन लोलानि कुंडला
निकर्णभूषणानि यासां ताः आजग्मुरिति श्रीबादरायणेः श्रीकृष्णांतिके सदैवात्मस्थितेः प
रिस्फूर्तेः किं वा तासां तद्गमनवार्त्तयाभाव विशेषोदयेन तासामिव स्वस्यापि गमनस्फूर्त्तेस्ता
तादिव श्रीकृष्णांतिकं तासां स्फुरणात् यद्वा आजग्मु अभिसस्रुरित्यर्थः यद्वा आसम्याकृस

वैपरित्यागेनजग्मुः यद्युरित्यग्रेवक्ष्यमाणत्वात् सपरममोहनवेणुगीतगायकः॥
यद्वा चिरंव्रतादिनाभीप्सितः यतःकांतःस्वामीनिजमनोहरइतिवा यद्वाकस्यस्तुरवस्याग्रे
तोनिष्ठायस्मात्सःपरममोहनतद्गीतेननिजदेहदेहिकाद्युपेक्षयाआत्मकर्मलोकधर्मादि
श्री·द्र. कंपरित्यज्यगताः इतिश्लोकत्रयेणावर्णयत् तत्रादौकांसांचित्तजानिकर्मपरित्यागमाह दुहं
६ त्यइति दुहंत्योभिययुःकाश्चिद्दोहंहित्वासमुत्सुकाः पयोधिश्रित्यसंयावमनुद्वास्यापराययुः
6 दुहंत्योगाःदोहंदोहनंदुग्धवानत्वानीमत्रगोपीनामपिकृत्स्नार्थेगोदोहनेप्रवृत्तेः यद्वाग्रंतभृते
नेन दोहयंत्यइत्यर्थः अभिययुःवेणुगीताभिमुखंययुः काश्चिदित्यादिकंवक्ष्यलक्ष्यभेदा
पेक्षयावनिताशानसूत्थपइत्यग्रेवक्ष्यमाणत्वात् तत्रत्वाम्नामयद्रहणंगोरवभरात् किंवाते ६

ष्वस्मरणविशेषकत्वेन प्रेमवैकल्यापादनं भूयात् एतच्च श्रीभगवतानुष्ठलस्र्वं स्वेच्छैव विहितमेव।
तथाभियाने हेतुः समुत्सुकाः कालविलंबसहनासमर्थाः एष हेतुरग्रेपि सर्वत्रानुवर्त्त्यः अपरा
ह्न्यस्य पूर्वेणापरेणाप्यन्वयः एवमग्रेपि अत्यन्तैर्व्याख्यातं यद्वा पयस्युख्लामधिश्रित्य अनुद्वा
स्यपक्वमपितलोनुन्नार्यसंयावं चाधिश्रित्यानुद्वास्यैति एवं कासांचित् सायंतनमुख्यकर्मद्वय
परित्यागमुक्त्वा कासांचित् लोकधर्मत्यागं पाक्षव्यावदत् तत्रादौ कासांचित्सामान्यबंधुभृत्या
दिपरित्यागमाह परीति पादेन परिवेषयंत्यस्तद्धित्वा पाययंत्यः शिशून् पयः शुश्रूषंत्यः प
तीन् काश्चिद् अश्नंत्योऽपास्य भोजने परिवेषयंत्यः बंधून् भृत्यादींश्च प्रति अन्नादिकं संविभज्यार्प
यंत्यः स्थिताः तत् परिवेषणं हित्वा ययुरिति स्पर्वेणैवान्वयः यद्यप्येतदपि सायंतनकृत्यांत

रेव प्रविशन्ति तथापि स्त्रीणां भर्तृर्वंधुशुश्रूषाद्युपेक्षया लोकधर्मत्यागानंतरेव सुखं संगच्छेतेति शुश्रु
षेत्याणामपि परित्यागं कासांचिद्दाढर्याय यंत्य इति पादत्रयेण हित्वेत्यनुवर्त्तते शिशून् पुत्रादीन्
हित्वा शुश्रूषंत्यः शुश्रूषमाणाः स्नानाद्यर्थोष्णोदकार्पणादिना सेवमानाः अश्नंत्य आशयंत्य
श्री द० ७ इत्यंनश्रूतेनंतं पतीन् भोजयंत्यः भोजनं भोजयितृत्व यद्वा एवं पूर्वं धर्मादिपराणामपि सती
नापरमसतीनां लोकधर्मत्यागं पादाभ्यामुक्त्वा कासांचित् देहोपेक्षात्यागमाह अश्नंत्य इति पादो
स्त्रिभिः आभ्यंत्यो भुंजानाः लिंपंत्यः चंदनपंकादिना निजदेहानुलेपनं कुर्वंत्यः लेपनादिक
मपास्येति ज्ञेयं अस्य इत्यस्य लिंपंत्य इति पदद्वयेनान्वयः एवं भोगस्य संस्कारस्यापि त्यागेन दे
होपेक्षा सिद्धैव यद्वा भोजनत्यागेन भगवत्प्रीणनस्य देहस्यापेक्षोक्ता कासांचित्त्वा श्रीभगवत्से

तोषणार्थं तद्भजनसाधननियोगभूषणपरित्यागमप्याह लिंपन्त्यः प्रमृजन्त्योऽन्या अञ्जन्त्यः काश्च
लोचने व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णान्तिकं ययुः तत्रैव हेतुं दर्शयन् किंवक्तव्यं देहिकदेहा
यथेत्तापरित्यक्तेति कासांचिद्देहविस्मृतिरपि ज्ञानेनत्याह व्यत्यस्तेति एवं दोहनादीनामेवाप्यव
श्यापेक्षत्वेन यथोक्तरीत्या श्रेष्ठत्वमुक्तं यद्वा केवलमत्रारम्भानि जनिजकर्मैव परित्यागएव तात्पर्यं तत्र
च व्यत्यस्तवस्त्राभरणत्वे वस्त्रादिधारणरीतित्यागएव सर्वत्र च तत्र तत्र हेतुः कृष्णगृहीतमानसा
इति समुत्सुकाः इति च प्रोक्त एव एवं सर्वा अपि कृष्णस्य परमाकर्षकस्वरूपामसुंदरस्य श्री
व्रजेंद्रनंदनस्यांतिकमेव ययुः ननु लज्जादिना विघ्नादिना वा कुतो नेयुरित्यर्थः परममोहि
तत्वात् यद्यपि सयत्रकांतस्तत्रा जग्मुरित्यनेन तदन्तिकगमनमेवोक्तं तथापि परममोहेना

निवेशेनात्यंतनिकटगमनविवक्षया पुनर्विशीष्टोक्तिरितिदिक् अधुनास्तीयैः प्रबोध्यमानामपि
श्रीभगवदपहृतचित्ततया तासामशेषविचाराभावमाह ताइति वार्य्यमाणाः पतिभिः पि
तृभिर्भ्रातृबंधुभिः गोविंदापहृतात्मानो नान्यवर्त्तंत मोहिताः ५ सर्वा एव ताः पत्यादिभिर्वा
श्री॰दृ र्य्यमाणामाणा धर्मप्रदर्शनादिना रुसलधारणादिनाचर्णं तु निरुध्यमाना अपि न न्यवर्त्तंत किं
८ तु यथा पुरेवेत्यर्थः अतः मोहितविवेकाः तत्कुतः गोविंदेन गोकुलेंद्रेण यद्वा गाः इंद्रियाणि ईश्व
४ रत्वेन महामोहनेन प्राणकोटिप्रेष्ठेनांतरेपहृते बाह्यानामन्येषां अप्रत्यर्पणसामर्थ्याभावा
त् अत्र प्रवाहवेगनीयमानानां यथा तटस्थानां तिष्ठ तिष्ठेत्याद्युक्तानानावाह्वानं वा नो धारणे
नापि न निष्ठेदितितिदृष्टांतोद्रष्टव्यः गोविंदेनापहृतस्थाकृष्टस्थानत्माजीवाख्यो यासामिति निरू ८

नौजीवेन विच्छेदः स्यादिति जीवनार्थं गता इति अभिप्रायार्थः; तत्रादौ पतिभिरिति तेषां पत्नीशु
भाशुभभागित्वेन मुख्यत्वात् ततश्च केवलेकन्यावैगुण्येन दोषस्पर्शात् स्नेहाच्च पितृभिः;
ततश्च तु: कीर्तिभयात् स्नेहविशेषाच्च भ्रातृभिः ततः कुलदोषशंकया बंधुभिरिति २
देवल्कन्यापि नाविज्ञापतिः पुत्राश्च बाल्ये के अभावे ज्ञातयः सर्वे न स्वातंत्र्यं क्वाचित् स्त्रिय
इति स्मृत्युक्ता अथ गौरी रक्तकामम्बोक्ताः ततः अपायः पुत्रानुत्पत्तेरत्र पुत्रा नोक्ताः पत्यादीनां चै
षां यथोत्तरं न्यूनत्वं मूले [illegible] नामापुत्तरोत्तरं तत्रहूश्यपतां संबंधयोन्यूनत्वात् तथापि एवं सर्वे
षां निवारणे प्रवृत्तावपि परपरेषां तत्र प्रवृत्तिः कुटुंबसमुदायेनापेक्षया यद्वा सर्वपूर्वैः
परित्यागे परपराश्रयाण्यांकयाते सेः क्रमेणाधिकारेण यद्वा ततदति कौर्तिभिः पति

श्रीभा.
५
9

भिः काश्चित् पित्रादिभिश्च काश्चन तत्र पतिभिः पत्न्य एव पित्रादिभिः प्रायोऽविवाहिताः
सुवासिन्यश्च पुत्र्य इति विवेचनीयं अन्यत्समानं यदि च ता स्तादृशविघ्नेन वारितास्तु भवि
ष्यन् तदा सत्य एव दशमीं दशामगमिष्यंति तासां सर्वासामेव भावविशेषं दृष्टांतेनैव प्रद
र्शयन् कासांचिदवस्थाविशेषमाह अंतर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः कृष्णं तद्भा
वनायुक्ता दध्युर्मीलितलोचनाः ९ काश्चिन्महालक्ष्म्यंशभूताः साधनसिद्धा गृहमध्यस्थि
ता एव नाममात्रपत्न्यादिभिः द्वारादिनिरोधात् पित्रादीनां द्वारदेशोपवेशनाद्वा न लब्धो
विनिर्गमः श्रीभगवदभिसरणयोग्यः यद्वा अन्यगोपीवत् वीणांपातिणामिवातिशीघ्रमगा
मनार्थे निर्गमः वहिर्न्निःसरणं यथा वा यद्वा वेः पक्षिणोपि निर्गमो यस्मात् छिद्रा १८

त्नात् दृशामपियमिताः अत एव कृष्णस्य निजेच्छा चिन्ता वा र्थैक परमानंदघनमूर्त्ति वारस्थुर्वि
शेषश्चिन्तयामासुः ध्येयमापदीत्यायुक्तन्यायेन तत्महापद्मिस्तारार्थे अभीष्टाप्राप्तास्त
नएव चिंताविशेषोत्पन्नैः कथं रथ्युः तस्य प्रस्तुतस्य श्रीकृष्णेन सह विलासस्य किंवा सुगो
प्यस्य संभोगस्य याभावनातया युक्ताः संयुक्ताः योगवत्यो वा सत्यः किंच मीलितलो
चनाश्चर्द्धमुद्रितनेत्राः सत्यइत्यर्थः यद्वा तुः एव विशेषेण ध्यानावेशेन वा मुद्रितनेत्राः ॥
यद्वा मीलितमंतर्हितं लोचनं यन्यपोषदृशानं यासां तथाभूताः सत्यः तन्नश्च सद्य एव श्री
कृष्णेन सह संयोगं प्राप्ता इत्याह ॥ ॥ दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ध्यानप्राप्ताच्यु
ताश्लेषनिर्वृत्याक्षीणमंगलाः १० तमेव परमात्मानं जारबुद्ध्यापि संगताः जहुर्गुणमय

श्री·टृ
१०
10

यं देहं सद्यः प्रक्षीणबंधनाः ॥ ध्यानेन विशेषतस्तद्रूपगुणादिपरिस्फूर्त्या दुःसहः प्रेष्ठ
विरहस्तत एव तेन तीव्रतापः तेन धुता अशुभाः परमात्मानमपि तं कृष्णं जारबुद्ध्यैव प्रेमा
तिविशेषेण सदाजयतीति जारः उपपतिस्तद्बुद्ध्या तद्भावेनैव न तु परमात्मबुद्ध्या संगताः
सम्यक्प्राप्ताः तेन सह मिलिता इत्यर्थः इति नित्यपरमप्रेमसंयोगविशेषेतः कथं गुणमयं
देहं जहुः किंतु गुणातीतं नित्यभगवत्प्रेमसंगमयोग्यं देहं प्रापुरित्यर्थः सच्चिदानंदघ
नरूपप्राप्त्या संगता इति भावः संगतिश्च नित्यैव स्थलस्थितजीवन्महाशंकादिवद्वा
नित्यसंयोगलक्षणाज्ञेया तत्रापि जारबुद्ध्या संगतत्वाद्विशेषः कश्चिद्दृश्यः तथा चोद्धव
द्वारा श्रीभगवदुक्तौ यामया क्रीडता रात्र्यां वनेस्मिन्व्रजस्त्रियोस्थिताः अलब्धरासाः कल्याः १०

एषो माथुर्मद्वीर्य्यं चिंतयेति अत्र च कल्याण इत्यनेन मद्वीर्य्यं चिंतयेत्यनेन चाशेषविशे
षणत्वमभिप्रेतः तत्राद्येन तत्रैव व्यक्तं भावि अन्यत्रैव्यंजितमेव तत्र तुः सशद्वेन तीव्रशद्वेन चानंत
कोटिकल्पेषु महानरकादिभोगैर्याबांस्तपस्तलोपि कोटिगुणस्तापः सूच्यते तथाऽच्युतश
ब्देन निर्द्दिष्टशब्देन चानंतकोटिकल्पेषु साम्राज्यस्वाराज्यादिभोगैर्यत्सुखं भोक्तव्यं च ततो
धिकमपि तत्सुखं ध्वन्यते श्रीभगवदाश्लेषसुखमहोदधेस्तत्सर्वस्य करणमात्ररूपत्वात् -
तत्र च श्रीभगवत्संबंधेन तत्तद्वासनात्तयोपि ह्नेयः अत एव प्रक्षीणेति प्रशब्दः तथाऽशुभं ना
मभगवन्नित्यसंयोगप्राप्तिसंबंधककर्मविशेष एव मंगलं च मानादिषु श्रीभगवदनुनया
दिजन्यसुखविशेषहेतुः सत्कर्मविशेषः तत्तस्तत्त्वयनित्यसंयोगसिद्धेः अत एव विरहेण

श्री॰ टी
॥
॥

मानादिनाच संपद्यमानत्वेमानंद विशेषाभावात् तासामत्र स्थितानां भावोऽन्योन्यः सौभा
ग्येन न्यूनतो ह्या अथवा तत्रत्य सर्वसद्गुणमयमपि देहं सयोजकः पत्यादिभिर्देहान्तर्विरु
द्धे तेन श्रीकृष्णप्राप्तेः तत्तत्संयोग्य देहान्तरेण तं श्रीव्रजेन्द्र किशोरमेव संगतात्यर्थः कृ
तः परमात्मानं परमप्रियमित्यर्थः तत्र हेतुः जारबुद्ध्यापि' अम्यत्समानं यद्वा ध्यानप्रभा
वेन सद्यः प्रकर्षेण क्षीणानि बंधनानि पत्यादिकृत द्वारबंधनादीनि यासां तथाभूतास्त्र
पि किं च ध्याने ध्यानेन वा हेतुनापि संगतो योऽच्युतः विरहेपि च्युतिरहितो भगवान् श्री
कृष्णस्तस्य किं वाऽच्युतेन यविच्छिन्नेनत्यर्थात् प्रेष्ठस्यैवाश्लेषेणया निर्वृतिः परमसुखं
त्याश्लेषरूपा निर्वृति र्वा तया ध्यानविशेषेणैव साक्षात्संभोगसुखमयत्वेन प्रतीय ॥

मानयानिर्वृत्त्या विशिष्टांग्यपि गुणमयं सर्वसद्गुणमयमपि देहं संज[illegible]हेतुः दुःसहो
यः प्रेष्ठस्य प्रियतमस्य श्रीकृष्णस्य विरहस्तेन तीव्रतापयुक्तं नर्महाज्वरः तेन युक्तो निरस्ता या
सुशीघ्रं यद्वा प्राणुः अभिनवाभा कांतिर्यासां ता किंच हीनमंगलाः अंगं नष्टं हेतिरोधाय
पन्यादिभिर्धारणादिनावहिर्त्रिः स्मरणार्थोद्घमेभित्रिकपादादिसंसर्गेण वा नष्टतिलकप
त्रावलीमाल्यादिमंगलाः महोत्तापजत्वैरत्वात् कांतिनाशेन तिलकादित्तयेण च तन्नाद्रग्ध
लिनयहीणे देहस्य श्रीभगवत्सेवायामयोग्यत्वमननादित्यर्थः यद्वा ध्यानप्राप्ताच्युता
श्लेषविर्वृत्त्याग्रहीणं हायमप्राप्तमंगलं सर्वाभीष्टप्रापकस्तत्कर्मविशेषफलं यासां तयै
वाशेषरतिस्सुखसिद्धेः तथाभूतायापि जनः कृतः दुःसप्रेष्ठविरहतीव्रतापेन धुनं धु

तिनिर्धूननं पीडनमिति यावत् तदेवाशुभममंगलं महाशैर्भाग्यं यासां ताः तासामपि महा
कल्पकोट्यधिकं कुर्वाणात्तस्मादसमोर्द्धदुःखभरान्महाभीतेरित्यर्थः यद्वाऽधुनाकंपिता
अपगतान्याशुभरविलंबातात्कालिकीभाग्यतिर्यासां अत्यंतविरहतापेनविचारणपगमादि
श्री·टी· तिभावः अत एव सद्यः प्रक्षीणबंधनाः सद्यः सपदि प्रकर्षेण क्षीणं बंधनं आशाबंधो यासां
१२ ताः देहरक्षया रासादिकेलिप्राप्त्यामइत्याशाबंधोपि नष्ट इति भावः अन्यथा अन्यगोपीवत्
श्रीवृंदावने व्रजांवः साक्षादवस्थित्यादिपरित्यागायोगः अत एव तस्माद्व्रनिवसंतीनां श्री
व्रजदेवीनां सौभाग्यमधिकमेव केवलं नित्यसंगेन विरहदुःखाभावात् कैश्चिद्भावविशेषे
णात्रस्थानाप्रकाशस्यापि विरहेपि प्रेमविशेषोदयेनानंदविशेषः स्यादिति श्रीभागवतामृ १२

नेविवृतमेवास्ति यद्वा जहुः अंतर्धीयामासुः यद्वा तं परमात्मानं नेत्राद्दृष्ट्यैव संगमासक्तिं

प्राप्तास्य पितुः सह प्रेष्ठविरहतीव्रतपेनैव धुताशुभाः धुतं विनाशितं जगतामेव अशुभं ना

पत्रयं याभिः तादृक्पापविशेषस्य श्रीभगवदीयगाढप्रेमोद्रेकमयत्वात् जगत्तापत्रयनाश

कत्वं तथाध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमंगलाः क्षीणं पुण्यं वृद्धिमेव गतं जगतां मं

गलं याभ्यः तादृग्ध्यानस्य जगतामभ्युदयकारित्वान्मंगलवृद्धिकारित्वं एवंभूताः सत्यो गुण

मयं देहं जहुः गुणाभावाः तद्यांतराभावाः आर्यवस्थैर्यमार्दवबहिर्भिः क्रमोपायात्तनागु

हजनादिसंकोचादयः बाह्याः संलग्नताद्गृहं तस्यावद्धावादयः तन्मयेनत्वधावेदेहं

जहुरिति मनसा भावत्यागएवाप्रदेहत्यागजन्यः यथाशृंगिप्रसंगेब्रह्मणस्तत्वसंवाव

त्यागएवदेहत्यागइति तृतीयस्कंधेकथितं ॥ अतः प्रक्षीणबंधनाः प्रक्षीणानिबंधनानिदिनांत
रेश्रीभगवत्केलिप्राप्तौ प्रतिबंधांतरायायास्तासांज्ञातिसंतप्तहृदयोयासां तद्वाञ्छौत्सुक्ययुताश्ले
षानिर्हत्याकालहेयाद्दलब्ध्वारासाः कल्पएवइति एवंज्ञानेनमोक्षोभवेत् प्रीतिभक्त्यादिनावै
कुंठलोकादिप्राप्तिःसख्यप्रेमादिनाश्रीभगवद्वशीकरणं तत्रचसामर्थ्येनप्रेमविशेषेणनित्यप्रे
ष्ठतयाव्रजेसंयोगइति सिद्धांतः अतस्तादृशभावोत्पन्नयेरासक्रीडासर्वथासर्वैःसेव्येति
श्री·र तात्पर्यं श्रीपरीक्षिदुवाच ॥ ॥कृष्णंविदुःपरंकांतंनतुब्रह्मतयामुने गुणप्रवाहोपरमस्ता
१२ सांगुणधियांकथं १२ श्रीशुकः परीक्षिदिति अन्येषांपरीक्षणार्थमेवोवाच नचाज्ञानेनसं
13 शयदितिभावः परंकेवलंकांतंप्रियंसुंदरंवा यद्वापरंकांतंश्रेष्ठंरमणंजारमित्यर्थः अतो १२

गुणेषु स्वसुखादिषु ततो नैधीबुद्धिर्यावत्तावत्तस्या गुणप्रवाहः संसारस्तस्योपरमः निवृत्तिः
कथं स्यात् सर्वपुरुषार्थचूडामणिर्मोक्षः कथं घटेत तमेव विदित्वा इति मृत्युमेतीत्या
दिश्रुतिप्रामाण्येन तत्त्वज्ञानेनैव संसारनिवृत्तिरिति मोक्षस्य सर्वतः श्रेष्ठत्वमनेनैव दौर्ल
भ्यमभिप्रेत्य किं वा मोक्षस्य साधनं शास्त्रे यदुक्तं तदभावमवेत्यायं प्रश्नः यद्वा परं कोऽनेक
दर्पकोटिमनोहरे आत्मकोटिषु एवं वाऽज्ञात एव शरणेषु तस्य सौन्दर्यमाधुर्य्यवैदग्ध्यानुरागा
दिष्वेव ननु स्वस्वरूपत्वे धीर्यावत्संनाशं तृणीकृतमोक्षैः सङ्गैरपि सेव्यपादाब्जानां श्रीह
रिप्रेयसीनां प्रति फल्गुतमो मोक्षः कथं संभवेत् इति मोक्षस्यातितुच्छतामननादयं प्र
श्नः मुनेर्हेमवद्धिः इति तद्धृत्तं च याज्ञात एव ततस्तत्परिहारस्तस्यैव कर्तुमुपक्रमत इति

भावः किंतु नाथ योनिसहस्रेति त्वयि भक्तिस्तु कीटेऽपि भूयासं जन्मजन्मस्वित्यादिव
चनैर्भक्तानां भक्तावेव तात्पर्येण भक्तिहेत्वर्थं जन्मादिप्रार्थनात् जन्मादिलक्षणसंसारो
परमोऽनुचितः अतो निर्वेदादिना भावपुष्टिहेतुगुणमयदेहत्यागेन गुणातीतदेहग्र
श्री·वृ· हणमप्ययुक्तमेवेति सद्गुणमयतापत्ते गुणाधियां गुणज्ञानामित्यर्थः गुणानी श्रीभ
१५ गवत्सेनोपलावण्यादीनां प्रवाहो यस्मिन् देहे तस्योपरमः कथं स्यात् श्रीभगवत्सेवा
14 यांदेहस्यायोग्यत्वमननेन अश्रमोद्भुदुःखमस्तीत्यावानासांतादृशदेहत्यागायोगा
त् यद्वागुणेषु श्रीकृष्णस्य लावण्यसौरभ्यादिषु रासक्रीडोपमदिव्यक्रीडादिषु वाधी
यीसानासामपिगुणः अन्यगोपीवत्क्रीडं दावने व्रजांतः साक्षात्रिवासादिलक्षणः ६

रासक्रीडादिलक्षणो वा सौभाग्यविशेषः तस्य प्रवाहस्याशुत्यानित्यत्वेन तया वा परंपरा
संस्थोपरमः कथं स्यात् सर्वसद्गुणमयदेहत्यागेन तदासिद्धेः किंच विचाराद्युपगमात् ना
भिहत्यज्यमानस्यापि तादृशदेहस्य तादृशनिजस्वभावेन कथं यातः स्यादित्यर्थः इति गूढः
प्रश्नस्यार्थत्रयेण पद्यत्रयं श्रीशुकः शुकइति किंचिदमर्षादिनाऽव्यक्तवाक्तया कथनेन
शुकत्वस्य त्वात् किंतु राज्ञोऽस्वाभिप्रायविज्ञानं व्यपि तद्व्याजेन तस्य श्लेष्मत्वहेतुको
न् काश्चिद्दुर्हृदयकुद्वान्निवर्तन्याह श्रीशुकउवाच उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथागतः
द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः १२ तत्र प्रथमपक्षे भक्तानां संसारोपरमे
विशंकया श्रीभगवन्माहात्म्येनावदसंभावनेत्यतेः क्रोधमुग्रं हृषीकेशस्सर्वेन्द्रिय

वृत्तिप्रदत्वेन परमोपकारिणमपि यद्वा हृष्योरश्मयः तद्वद्दीप्तिमंतो वजलाब्जकोशाय
स्पृतं परमसुंदरमित्यर्थः तादृशांश्चपि कृष्णं द्विषन्नपि चैद्यः शिशुपालः सिद्धिं मुक्तिं गतः
प्राप्तः यथायतत् पतनमुरस्तात् सर्वेसन्नमस्कंधेनेतु भंगक्रमेव शकटाथः शयनेशकटपा
श्री·वृ· तसंकराद्विमुक्ततयाऽ स्यामुनर्ज्जीतइवेत्यधोक्षजः श्रीव्रजेंद्रनंदनः सः एयोयासांतः
२५ तस्यकाएयाः सिद्धियांतीति किमुत वक्तव्यमित्यर्थः अन्यत्रैर्वोजितमेव द्वितीयपक्षेवै
15 घोपि सिद्धिं गुणातीनसच्चिदानंदविग्रहप्राप्तिलक्षणां नतु विदेहकैवल्यरूपां प्राप्तः॥
कस्याएयास्तु तादृशीं सिद्धिं यांतीति किमुत वक्तव्यं अतः प्रेमविशेषेत्सेकक्तनात् व्रजवि
रहजत्वाभातिशयाद्वीनास्ताभिर्नित्यादिध्वंसः स्वीकृतः यदुक्तं गुणातीतदेहग्रहणे भ २५

क्तानामप्युक्तं इति तत्र सदैन्येना किंच न्येन भावितं भावविशेषं सर्वोत्तमवुद्ध्यावहद्भ्यो
भक्तविशेषेभ्यो गुणातीतदेह: प्रेमाविर्वत विशेषाभावात् प्रायेण नाम्नावचने श्रीभगवत्प्रे
यसीनां तु प्रणयेनोत्तमत्तम नसानत्र वानिरुक्तानिर्दिनित्यनीय पक्षे हृषीकेशद्विषत्रपि वैय:
सिद्धिं निजाभीष्टस्य हृन्निपुनर्भपत्रत्यार्थ दलतणप्रापा: इत्यत्र हृषीकेश नाम सामान्य
स्य श्रीभगवत्स्वरूपस्य वाचकं प्रथोत्सज नाम तु प्रोक्त निरुक्त्या विशेषस्य तत्स्वरूपस्य प्र
लस्यावतारेभ्योवतारिणश्च कामधिकां माधुरीं प्रकटयतः श्रीव्रजराजकुमारस्य एया: परम
ममधुरप्रेमसाति न्य: सर्वदा यथावदन्यव्रजदेव्यश्च वृक्षावस्थानेन स्वाभीष्टस्य व्रजे प्रेमविला
सादे: सिद्धिं प्राप्स्यंतीति किमुत वक्तव्यं एतत्तु हन्तं प्रेतरर्द्धीन त्याल सयता किंवा म्या

वंत्यांताएव देहत्यागात याव्यं जयता मया हृचितमपि भवद्भिर्धैर्नावधारितमिति सर्वे मन
वेद्यं अहोजन्मत्रयास्तु रत्नप्रापक मुनिशापांते चैद्यः श्रीकृष्णमुष्टयत्नेन चक्रजन्दे व्यः सिद्धिं या
ताइति किंवक्तव्यं यथा कथं चित्तं वेधेनापि निजाभीष्टसंसाधकं भावविशेषं श्रीभगवं
श्री·द्द तं एव वा श्रीभगवत्स्वभावेन सर्वे प्राप्नुवंतीत्याह न नृणां निःश्रेयसार्थाय व्यक्तिर्भग
१६ वतो नृप अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः १४ कामं क्रोधं भयं स्नेहमैक्यं सौहृ
16 दमेव च नित्यं हरौ विदधतो यांति तन्मयतां हि ते १५ निःश्रेयसं भक्तिः तदेवार्थः फलं
किंवा न स्यार्थः प्रेमानस्मै तत्प्रदानार्थमित्यर्थः यद्वा निःश्रेयसं मुक्तिः तस्यार्थो भक्तिः
व्यक्तिः प्राकट्यं इति सात्तान्द्भगवत्त्वं एवाभिप्रेतं अत एव भगवतः अवतारिणः परमेश्वरस्य १६

यद्वा नृणां निःश्रेयसामर्थायैवेत्यत्र हेतुः भगवत इति अन्यथा भ्रूविजृंभमात्रेण ब्रह्मांडको
टिसंहारसमर्थस्य भूभारकंसादिवधार्थव्यक्तेरनुपपत्तिरित्यर्थः हे नृपेति यथा नृणां स्तेभा
र्थ एव इतस्ततो भवादृशस्य राज्ञो गमनमिति भावः भगवत्त्वं एवाह अव्ययस्येत्यादिभिस्त्रिभिर्विशे
षणैः आत्मदर्शनादिनापि न व्येतीत्यव्ययः तस्य कुतः अप्रमेयस्य अच्छिन्नस्येत्यर्थः तत्कुतः
निर्गुणस्य मायागुणातीतस्य तत्त्वकुतः मायागुणानामात्मनः प्रवर्तकस्य यद्वा नृणां निःश्रेय
सार्थायैव व्यक्तिर्जन्म अन्यथा तु कथं चित्त्र संभवेदित्याह अव्ययस्य जन्मादिविकाररहित
स्य किंच अप्रमेयस्य तादृशस्यापि व्यक्तौ हेतुः गुणात्मन इति निजकारुण्याद्यशेषगुणानां
चेतयितुः प्रकटपरस्येत्यर्थः; अन्यत्समानं अथवा ननु तर्हि कथं परदाराकर्षणं तत्राह

अव्य यस्य परदारविनोदेनापि न किंचिन्नस्यव्येतीत्यर्थः ननु तथापि तस्य तेन किं नाम प्रयोजनं
तत्राह अप्रमेयस्य तु विर्तस्य तस्य लीलाकेन वितर्कयितुं शक्यतेत्यर्थः कुतः निर्गुणस्य गुणा
त्मनः निर्गुणोपि सन्नयः गुणानामात्मा आश्रयस्तस्य निर्गुणत्वात तद्दोषलेपः गुणात्मत्वाच्च श्री
श्री·टी गोपीभिः सहरतिरिति सिद्धांतः यद्वा ननु तथाप्यस्मत् प्रीत्यर्थं स्वयं विचार्यो व्यक्तामिति चेत्त
१७ त्राह निर्गुणस्यापि जनस्य गुणानामात्मनः प्रवर्त्तकस्य रासक्रीडया जगतामेव परमप्रेम
17 सिध्यासर्वसद्गुणसंपन्नेः एतदभिव्यक्तिरग्रे रासक्रीडोपसंहारे भविष्यत्येव अनोहरौ यथा
कथं चिन्त्संबंधमात्रेणापि सर्वचित्ताकर्षके सर्वदोषहरे वा अर्थे एव शद्रः कामादिकमपि नि
त्यं कुर्वतः नेकामादिविधायकाजना; यद्वा कामादिनाप्रसिद्धादंडकारण्यवासिमुनयः १७

तथाऽऽऊक्रादयः केशिकंसादयश्च यद्वा तेनतयोर्हरिस्तस्मिन्नित्यन्वयः विदधतेइति क्वचि
त्पाठः हिनिश्चितं तन्मयतोध्यानेन हर्यैकनिष्ठतां यद्वा सारूप्यादिप्राप्त्या तत्स्वरूप
तां प्राप्नुवंति नित्यमिति तत्र तत्राभ्यासेन तन्निष्ठया तन्मयतायामविलंबत्वं बोधयति
अन्यथा कदाचित्कतया तत्तदावेशाभावेन शीघ्रं तन्मयत्वासिद्धिः सारूप्येव भक्त्यादिभेदे
न सुखविशेषलाभ केवलदुःखध्वंसादिना तथा श्रीवैकुंठपार्षदत्वसिद्धलोकवासित्वादि
नावैलक्षण्यसिद्धांतानुसारेणभेदस्यापरेव यद्वा त्वणांनिः श्रेयसार्थायैवेत्यत्र हेतुमाह ह्रिय
तः कामादिकमपिकुर्वतस्तन्मयतां यांतीति अन्यत्र सांतां सौहृदमिति दृष्टांतः वेति क्वचि
त्पाठः तत्र श्वकाशब्दः उपमार्थ एव तथाचोक्तं श्रीनारदेन सप्तमस्कंधे कामाद्वेषाद्भया

स्नेहाद्यथा भक्त्येश्वरे मनः आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः गोप्यः कामाद्भयात्कं
सो द्वेषाच्चैद्यादयो नृपाः संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो इति तत्र गोप्य इति व
श्री·टी· हिर्दृष्ट्या केवलमौपपत्यकाममात्रापेक्षया यद्वा तन्मयत्वप्राप्तिमात्रापेक्षया च कामादी
१८ नां सर्वेषां एकत्र गणनं फलतस्तु महान्विशेष एव एतच्च सर्वं श्रीभागवतामृते विस्तृत
16 मेवास्ते रसामृतार्णवे च श्रीरूपेण तत्तद्विशेषाभिव्यंजनेन विस्तारितमस्ति अत्रापि च य
थास्थानमग्रे विवरणीयं नचैवं विस्मयः कार्यो भवता भगवत्यजे योगेश्वरेश्वरे कृष्ण या
त एतद्विमुच्यते एवमीदृशो विस्मयः संदेहः आश्चर्यबुद्धिर्वा पुनर्न कार्य इत्यर्थः भवतेति॥
अनेन क्रियतां नाम भवता तु गर्जदारभ्य जन्म महिमाभिज्ञेन कथंचिदपि कदाचिदपि न १८

कार्यएवेत्यर्थः अतएवगौरवेणभवतेतिनचत्वयेत्युक्तं विस्मयाकरणेहेतुः भगवति
अष्टावैश्वर्यमुक्तेन तु तर्हि कथं देवकीगर्भतोजन्म तत्राह अजोजीवन्नजायते किंतु
स्वेच्छयैवभक्तवात्सल्यादिनास्वयमाविर्भवतीत्यर्थः ननुतर्हिदेवक्यादीनांपुत्रत्वयाक
थंस्तानमस्तु तत्राहत्योगः दुर्घटस्यघटनायांसामर्थ्यविशेषस्तस्येश्वराः पितृवसनका
दयस्तेषामीश्वरे अतः स्वेच्छयास्वयमाविर्भावश्चदेवक्याः पुत्रत्वाचसंभवेदेव अचिंत्यैश्व
र्यत्वात्तस्य अतएववसुदेवेनराहुतिपरब्रह्मणि यद्वादुर्वितर्कानंतमहात्म्यामृतसागरत
यातस्यप्रसिद्धेः इत्यर्थः अथवाभगवतिपरमेश्वरेअनोऽजेजीववत्प्राकृतजन्मरहिते
रूपयास्वयमेवाविर्भावात् अतएवयोगेश्वराणांभक्तियोगनिष्ठानांश्रीनारदादीनामी

श्रेभक्तयासेव्यो भक्तिविशेषप्रकटनात् किंवा योगेश्वराणांमहाश्चर्यशक्तिमतामीश्वरे निजा
श्चर्याशेषैश्वर्यप्रकटनात् तत्रापिकस्मे श्रीगोकुलोत्सवे यतः कस्मात् एतत्स्वएवरात्मकं सर्वं
जगत् अशेषसाधनरहितं अपि तादृशमात्रेणतदीययत्किंचित्संबंधाभासमात्रेणापिस्व
श्री·टी० यं एवविशेषेणमुच्यते श्रीवैकुंठलोकं प्राप्नोतीत्यर्थः एतच्चभाविकाशितपुरतरुलता
१९ दि श्रीवैकुंठप्राप्त्यभिप्रायेण तथाचप्रथमस्कंधे श्रीकुंतीस्तुतौ इमेजनपदाः स्वृद्धाः सु
19 पक्वौषधिवीरुधः वनाद्रिनद्युदन्वंतोह्येधंतेतववीक्षिताइति अत्रस्वृद्धाः पुनरेधंतइ
ति अनेनचवैकुंठप्राप्तिसामग्र्येवाभिप्रेता अग्रतेव्याख्यातं पद्या ननुवहुलयागयो
गादिमहासाधनेनदुःसाध्यापितन्मयता कथं यथाकथंचित्कामसंबंधेनसिद्ध्येत् १९

तत्राह नचेति अर्थः सएव अतोस्याराससक्रीडायाः श्रवणादौमुक्त्यादिपरैरपि क्रीडामयत्वबुद्ध्यानोदा
सित्वं किंतु सर्वैरेव निजेष्टतरत्नीनसिद्धये विशेषतोभक्तैः परमफलत्वेनेयं सदासेव्यैवेति प्रागेव
तत् प्रकरणोन्यापनतात्पर्यंदृढीकृतमितिदिक् अथवा श्रीव्रजेंद्रव्रजगोपीत्वेन भाग्यविशेषान्नाम्र
पिहितविघ्नाः सद्यः एव श्रीकृष्णसंगतास्तदानीमेव रासक्रीडामलभंते निव्याख्येयं तथाहि अंतर्गृ
हे गताः पापैर्वद्धापत्यादिभिर्गृहांतस्यापिताः अतएव कथं अप्यलब्धविनिर्गमाः तद्भावनायुक्ताः
तस्याः श्रीकृष्णेन सहरासक्रीडायाजावनायुक्ताः ततश्च प्रक्षीणबंधनाः ध्यानस्य प्रभावेनैवमुश्लथी
भूतबंधनाः सत्योगुणमयं पत्यादिभिर्बंधाद्धत्वात् पापमयं पापप्रचुरं देहं जहुः विशेषणेनात्य
र्यदेहस्यपापमयत्वाजहारित्यर्थः ततश्च परमात्मानमपिजारबुध्यैवतंव्रजराजकिशोररूपमेवसं

श्रीटं.
टी.
२०
90

गता: यद्वा परमात्मानं परप्रियमित्यर्थ: ध्यानप्रभावमाह ध्यानेनैव दु:सहो य: प्रेष्ठविरह: ती
व्रतापस्तेन धुतं निरस्तं तुच्छीकृतं अशुभं जन्मनामशेषदु:खभोगो याभि: तस्मादपि तद्विरहदु:
खस्याधिक्यात् किंच ध्यानं च त्यत्वनागतं मंगलं जगदशेषसुखभोगो याभ्य: तस्मादपि श्री
कृष्णाश्लेषसुखस्याधिक्यात् अन्यत्समानमेव ततश्च यामयाक्रीडता सत्त्वविनाशायमर्थ: प
त्यादिभिर्बद्धत्वाद्भजनशास्त्रिया तापि पश्चान्महीर्घयवितयामालब्धरासांतप्रापणारासावभूवु: किंतु
आयु:समसमेवति श्रीपरीक्षिन्मश्नस्यायमर्थ: कांतबुद्ध्याध्यानेन गुणेषु तत्संगमादिसुखेषु न
नुगुणातीतरूपे धीर्यासां इति ध्यानस्यान्त:शून्यतासूचिता तथापि पत्यादिभिर्विधनार्थप्रयुक्ता या:
पाशपरंपरया उपरम: निवृत्ति: कथमिति श्रीशुकदेवश्च यथाकथंचिद्ध्यानेन संसारबंधादपि

विमुक्तिः स्यात् श्रीकृष्णस्य तन्मात्रेणोक्तासां तद्ध्यानविशेषेण पाशबंधनाशो नेति किं वक्तव्य
मिति कैमुतिकन्यायेनैव दृढं याति नाध्यानादप्यभीष्टसिद्धिमाह उक्तमित्यादिना ग्रन्थानुसंग
तमेव तादृष्ट्वान्तिकमायाता भगवान्व्रजयोषितः अवदद्वदतां श्रेष्ठो वाचः पेशैर्विमोहयन् ॥ ॥
ताः वेणुगीताकृष्टाः परमविह्वलाः व्रजस्य योषितः सर्वा एव नवतरुणीः यद्वा व्रज एव स्थातुं यो
ग्याः नहि बहिर्वर्तनं तरां गन्तुमित्यर्थः तत्रापि निर्जनान्तिकमेवायाताः प्राप्ताः न तु लज्जादिना दू
रतः स्थिताः दृष्ट्वा अवदत् स्वागतमित्यादि वक्ष्यमाणं किमर्थं वाचः पेशैर्विलासैर्विशेषेण मोह
यन् चित्तं हरन् स्वविषयकं भावं नितरां वर्द्धयितुमित्यर्थः तत्राग्रे व्यक्तं भावि ननु वाग्विलास
मात्रेण कथं मोहनं स्यात् तत्राह वदतां चतुर्मुखसहस्रमुखादीनां वाग्मिनां श्रीव्यासादीनां

वाकवीनांश्रेष्ठः कुतः भगवान् साक्षात्सर्वैश्वर्ययुक्तः यद्वा वाचः पेशैर्गीर्विशेषैः एकैव वाकस
मुपेक्षामयी संप्रार्थनामयी चेति विरोध्युभयकोटिस्पर्शादेव कैतवपरिपाटीपाटवैरित्यर्थः सा
क्षाद्धर्मादिबोधनपरत्वेपि निजान्तरंगरिंसया तात्पर्येण स्वविषयकभावदृढीकरणात् तत्र हे
श्री· तुः वदतांश्रेष्ठ इति यद्वा रंतुं मनश्चक्र इति तुगो कलं वामदृशां मनोहरमित्यादिना तस्य ताभिः
वृ·टी· सह रिरंसा व्यक्तैव एवं मनस्यप्यदेव धर्मादिपरवाग्विलासैश्च वचस्यप्यदेवेत्येवमवहित्थया ता
२१ विमोहयन् वाक्यार्थनिर्द्धारणाशक्तेः वस्तुतस्तु वाचः पेशैः सौदर्यैरित्युक्तिपरिपाटीमात्रमेवत
४१ त् नानृतार्थाभाव इति बोधयत्येव यद्वा सर्वज्ञोऽनर्थनोपि वाच्यार्थोऽदृष्टव्यः तथाहि व्रजयोषितः
सह निजप्रेमपराश्चपितन्त्रापिताः तथाभूता अपि तत्रापि तदानीं निजांतिकमायाता अपि ॥ २१

तावाहृष्टापि स्वयं च भगवान् सर्वज्ञत्वेन तासां भावाभिज्ञोपि वाचःपेशैः कपटवाक्यैर्विमोह
यन् परमवैकल्यप्रापयन्नवदत् किमर्थं वदतां नर्मोक्तिचतुराणां मध्ये श्रेष्ठः नर्मविशेषार्थमि
त्यर्थः यद्वा वचःपेशैः तासां वाग्विलासैर्हेतुभिः तच्छ्रवणार्थमित्यर्थः यद्वा पेशैर्निजसौन्दर्यैर्वि
मोहयन्नवदत् कुतः अकारप्रश्लेषेणाप्यवाचः लज्जया किमप्यवदन्तीरित्यर्थः अतस्तासां प्रत्यु
क्तिश्रवणायेति तात्पर्यं कुतः वदतां श्रेष्ठः उक्तिभङ्गीकुशलानां स्वत एव परोक्तिचातुरीश्रवण
त्वादित्यर्थः अन्यत्समानं एवं सर्वथा वस्तुतो मिथो भावविरुद्धार्थमेव ज्ञेयं विदग्धावलिष्ठ
त्वात्तु विदग्धास्तु विदग्धालिशिरोमणेः॥ वाचोर्थे लिखने मेनाः सचानन्यगतेर्गतिः प्रथमम
वहित्थ्यौदास्यमवलम्ब्यमानः सादरमाह स्वागतं वो महाभागाः प्रियं किं करवाणि वः व्र

श्री
हृ-टी.
२२
23

नस्यनामयं कश्चित् इहागमनकारणं वो युष्माकं शोभनमागमनं वृत्तमित्यर्थः यद्वा वो युष्माभिः
स्तु शुश्रागतं किं महान् भागो भाग्यं पातिव्रत्यादिलक्षणं यासां तासां संबोधनं अतो वो युष्माकं किंक
र्यं करवाणि अपि तु न किंचित् कर्तुं शक्नोमीत्यर्थः यद्वा किंकरवाणि न दाक्षापयंतीत्यर्थः महाभा
गानां इत्याचरणेन मम मा पिधर्मविशेषो भावीति भावः एतत्सर्वं स्मृतत एवौदासीन्यं गमयत्येव लो
के प्रायो गौरवेणैवैतादृशप्रश्नप्रवृत्तेः अत एव हर्षं यज्ञपत्नीः प्रत्यप्येवमेवोक्तं केवलं तास्तु ब्रा
ह्मणीत्वेन परमादरादास्यतामिति आस्तु व्रजांगनास्त्वेव प्रकृत्यैव एयत्वात् इत्यं वदति विशेषः
यद्वा वः इत्यं किंकरवाणीति साक्षात् सुरेवोक्त्यानाभ्यो प्यास्तु परमौदासीन्यमेव सूच्यते। वस्तुतस्तु
एतासां तादृशागमनं दृष्ट्वा परमप्रीत्यैवाह स्वागतमित्यादि महाभागा इति रासक्रीडायाम २२

ह्लालक्ष्मीर्नोऽपि सौभाग्यविशेषाभिप्रायेण किंवा सर्वपरित्यागेन तदेकापेक्षतया तासामाग
मनात् स्वस्य च तादृशान्याभावेन स्वस्मादपि महत्त्वविवक्षयोक्तं अतस्तासां प्रेमपरवशः स त्वा
ह प्रियमिति तत्त्व एव यत्नं न वशीकरणचतुरस्य विदग्धशिरोमुकुटमणेः स्वाभाविकमेवेति
दिक् अत एव यज्ञपत्नीष्वक्रूरेऽस्तु विशेषः प्रियवर इति वियुक्त एवेति एवं आदौ सदाचाररी
त्यागमागतजनेषु वर्त्तुं योग्यमुक्त्वा सर्वा एव युगपत् ससंभ्रममागता वीक्ष्य स्वयमपि कैत
वेन सभयसंभ्रममेव पृच्छति व्रजस्येति अनामयं मंगलं कच्चित् प्रश्ने ननु चतुरसिंहन
थासति गोपादयो व्यागताः स्युरिति चेत् सत्यं तर्हि अंगनाविषयकः केषामपि दैत्यारी
णां उपद्रवो नूनं भवेदिति ध्वन्नितया आशंकेव मारोपमाह ब्रूतेति निजागमनस्य का

श्री
रु०टी
२३
23

रणं हेतुं प्रयोजनं वा अथवा तदुक्तमभिप्रायान्निर्द्धारेण लज्जया अनुत्तरस्तावीत्यशोक
वेगेनामंगलस्याश्राव्यत्वेन वा किंचिदवदंती मत्वेव किंचिदन्यद्देवोस्यापयन् स वैयग्र्यं द्र
ष्टुमिति व्रजस्येति एवं सर्वमग्रेप्याशंकादिकं कैतवेनैवेति ज्ञेयं तथाप्यवदंती: प्रसन्नमुखी
आलोकयांस्तनामभिनयन् सलज्जमिवाह। द्वतेति शक्रकर्तृदुर्हृष्यादिनैवमन्यार्थेत्र रात्रौ
प्राय: सर्वासामीदृगागमनकारणमदुर्वितर्कत्वात् स्वयमेव स्वयंदूतेत्यर्थ: वस्तुतस्त्वयं नर्म
मंगिरेव एकैव वाक् समुपेक्षामयी संप्रार्थनामयी चेत्युक्तं तत्र समुपेक्षामयीत्वप्रपंचि
तं संप्रार्थनामयीत्वं कथ्यते इदमेव श्रीपार्थनयाग्रे प्रतिश्लोकं लेख्यं तथा हि भो महा
भागा: महान् भागो भाग्यं यासां ईदृशी ज्योत्स्नी तत्रापीदृशं वनं तत्रापीदृशो नुवर्त्तीज: २२

नोपमन्तुकूलः तत्रापीदृशं वो नद्यैव नाऽरि इति महद्भाग्यमेव वो युष्माकं स्वागतं अतो युष्मा
कं प्रियं किंचित् करवाणि यद्वा वो युष्माभिः कृत्वा निजेष्टं किं करवाणि किमपि साधयिष्या
मीति किंच युष्माकं आगमने नैव ब्रजस्य मंगलं व्यक्तं अतः आगमनकं युष्माकं आगमनं तु
रवनदेव अरण्यं शरण्यं यस्य तं मां कश्चित् किं कृतं मया सह आलापं किं करिष्यथेत्यर्थः यद्वा
अव्ययानामनेकार्थत्वात् कश्चित् किंचिद् कृते त्यर्थः रजन्येषा घोररूपा घोरसत्व निषेवया
प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥१९॥ एषा प्रत्यक्षा प्रत्यक्षत्वमेवाह घोररूपं स्वरू
पं यस्याः सा नाम सत्वात् किंच घोरैः सत्वैः प्राणिभिः नितरां सेविता व्याप्ता अतः प्रति यात
निवृत्य गच्छत नात्र विलंबो युक्तः इत्याशयेनाह इह वने किंच हे सुमध्यमाः सुंदरीभिः स्त्रि

न् भयानके काले स्थाने वस्यातुं न युज्यत एवेति भावः अन्यैर्व्यर्जितमेव यद्वा ननु रसिकशे
खरभवानिव वयमप्य यविरुद्धं वा आगतास्म इति चेत्तत्राह रजनीति एषा रजन्येव ननु स्निं
ननु रात्रिविलासिन् ततः को नाम दोषः तत्राह घोरेत्यादि स्वभावतो भयजनिका तत्रापि यो
श्री॰ रसत्वैर्निषेविता यद्वा हे कमललोचन ज्योत्स्नीयं रात्रिः तत्राह घोरसत्वेति अतः स्त्रीभिरिह
वृ॰ टी॰ वने न स्थेयं स्यातुं योग्यमिति व्रजं प्रति यात शेषेण स्वयं स्वस्य शोवक्ष्यो व्रजं पुरुषस्त्र
२४ हं स्वस्य पत्नीनिति यावत् प्रतियात भजत एकाकिनामयावक्षीकं दृष्याचरणस्याश
क्यत्वात् अतोत्र न स्थेयमिति नर्मविशेषः ननु भीरुष्ववरघोरसत्वेभ्योस्माकं न भयं तत्रा
ह हेसुमध्यमाः हे कृशमध्याः ननु मध्यत्वात् कृशाङ्गीनामबलानां बलिष्ठेभ्यो भयं स्या २४

देवेति भावः वस्तुनश्चैतन्नामास्य विषयकभावस्पष्टीकरणार्थं किंवा नर्मणाउत्कंठ
विवर्द्धनार्थं श्लेषार्थश्चायं घोरसत्वादिनाजनकोप्यायास्यतीति भावः यद्वा एषाउदित सूर्य
वेद्वाजनान् रंजयतीति रंजनीअघोररूपानमोपगमान्॥ यद्वा शंताआसत्रगुरुसात्विक
मंगलमासकार्त्तिकसंबंधात् इति नाममंडलयोग्यत्वं किंच नघोरैः रसविघात्मकत्वेन भय
जनकैः सत्वैर्युष्मल्लन्यादिभिर्हिनवर्त्रिवेविता यद्वा अघोरैर्द्दरावनस्वभावेनमिथोमित्रत्वप्रा
प्ता भयाजनकैरेवसत्वैः सर्वप्राणिभिः किंवा अघोरैः सत्वैर्हरिणमयूरादिभिर्वानिभत
कौं यद्वा घोरं दुष्टानां भयजनकं किंच अघोरं केषांचिदपि जनानां भयाजनकं सत्ववले
यस्य मम मेति बालाश्वासनार्थं किंवा अघोरं शांतास्तु खदं सत्वं स्वभावायस्यतेनमया

निषेविता इति निजवैदग्ध्यविज्ञापनं अतः सर्वथा त्वर्जनं प्रतियातु इहैव स्थेयं युष्मा
भिः कुतः स्त्रीभिः तत्रापि हे सुमध्यमाः परमसुंदरीत्वान्मदंति कएवात्रस्यात्तु युज्यतएवे
त्यर्थः ननु पुरुषसिंह परमबलीयसस्त्वं तिके स्थितानां नः कुतो भयमित्याशंक्य सशंक
श्री माह मातरः पितरः पुत्रा भ्रातरः पतयश्च वः विचिन्वंति ह्यपश्यंतो मा कृढ्वं बंधुसाध्वसं
दु॰टी श्रादौ हेतुविशेषान्मातरः ततस्तासां वने बहुपरिभ्रामणाशक्तास्तेहेन कलंकभयेन च पितरः॥
२५ विवाहितकन्याविषयकापेक्षाविशेषाभावेन तेषां शैथिल्ये सति पुत्राः पुत्रतुल्याः मातृदोषेण ल
25 ज्जाविशेषोत्पत्तेः मातृदुर्विनयसंगोपनार्थं चार्थं परिहारार्थं वा बाल्येन बहुपरिभ्रमणाशक्त्या
वा तेषां शैथिल्ये भ्रातरः स्वभावतः परमस्निग्धत्वात् तेषामपि लज्जादिना कथंचिच्छैथिल्ये २५

पतयो विचिन्वंत्येव पत्नीगुणदोषभागित्वात् एवमन्वेषणे तेषां यथोत्तरं श्रैष्ठ्यं तेनच पत्नीना
मवध्यमानामनमभिप्रेतं यद्वा काश्चिन्मातरः काश्चित्पितरइत्येवं यथास्तित्वं किंवाप्रोक्तपु
त्रैव स्वैरुत्पादिनाक्वापि मातरः क्वापि पितरइत्येवं तेसर्वेऽत्र एवापत्यं तः गृहेषु वनेषु वाघ्नन्ता
लोकयंतः विचिन्वंति इतस्ततोमृगयंति हि वितर्के अतोयदि कदाचिन्नेत्रागतानामत्यार्थेषु
स्थान् पश्येयुः तदायुष्माकममवलज्ञाभयंचस्यादेवेतिभावः अतोऽत्रावस्थित्यात्तिजवंधु
भ्यो ममात्मनश्चसाध्वसंभयं माकुरुध्वं नोऽस्मादयत्र यद्वा महामंत्राभित्रांतैव स्तुर्गमवनमध्येना
गमिष्यंति आगताश्चपितरइदंत्येव तत्राद्युष्माकमप्राप्यावाद्यादिभ्योयुष्माकमनिष्कंटकया
वंधूनांभयंशंकांनेत्यादयत साधवोऽवंधुवत्सलाः इतिन्यायात् अतस्तेषु स्नेहेन विवर्त्तध्वमिति

श्री
गी·टी·
२६
26

भाव: यद्भावो युष्मान् मा पुर्महीर्यं चिंतयेत्यादिवत् मां मां च अपवर्यंतो युष्मान्माभ्राद्रयो विवि
र्नेति ननु निर्जयसिंहविचित्वं तु पवर्यं तुवा ततः किमित्यत आह वंधुज्योभयंअहं तु अवश्यक
स्तात्यपेक्षयानीतनिर्देशः कुरुतेत्यर्थः अन्यथा स्त्रीणां स्वातंत्र्यापत्त्या बहुदोषात्पत्तिरिति भाव:
अथवा स्तु भवन त्वन्यार्थ स्थितानन्कुन स्थिरदपिवि ’ मइत्याशंका चक्षुर्मुद्रणपूर्वकं माभिनय
माह मत्यार्थे स्त्रीभिर्नैस्थेयं आबाल ब्रह्मचारित्वेन मम स्त्रीसंगपरिहारादित्यर्थः अहो वत
शिवशिव बालिकानां रुद्धानां वा कथंचित्संगेन दोषोपि किल न घटेत रूपं च नवयौवनारूढा
इत्याह हे सुमध्यमा इति ननु महाकपटपटो गृहेषु स्वामिः सहसंगो भवतो बहुधा भवत्येवेत्या
शंक्याह २ हेति इह निर्जनवने समये च प्रदोषे इति दोषविशेषं श्रीमुखभंगीविशेषेण सूचयति २६

अतोत्रेदानीं युष्मत्संगात्मम दुःकीर्त्तिरेव गाढं स्यादिति सर्वथा श्रयानैवेति ननु सुप्रतिष्ठ
न कोपि ज्ञास्यतीति दुष्कीर्त्तेर्मा भैषीर्भनज्ञाहमानरइति अतोनूनम आगताद्दैवंस्यैवेतिभाव:
अतो मद्वंधूनां मद्वनभंगात्मम दुःकीर्त्तिर्वा भयं मा संपादयत यद्वा वोमामाद्योयुष्माकं गृहेभ्यो
निर्गमाद्दिलाभमत्यार्थे गमन मा शंकमानत्र कुत्राप्यथेष्टंपतो विचिन्वंति स्वामीपृथैव वर्त्तमाना ॥
विचेष्टत्वेव ननश्चाग्रायानैसैलेर्मेथियुष्माभिः महितेदृष्टेयुष्मद्वेनुकमदुःकीर्त्तोयुष्मान्श
निकृद्वेभ्यो मद्वंधुभ्यो भयं कुरुतेत्यर्थः अन्यत्समानं वस्तुतस्तु तेभ्यो भयोत्पादनेन द्वारस्तुगुम्ना
स्यानेतानेतुं नथोक्तमिति किंवा वाग्भंग्या वंधूनामुपेक्षां तेभ्यो भयाभावं चं द्रढयतीति श्ले
षार्थश्चायं एवार्थे हि शब्दः अंधा इवापथ्यंतन एव विचिन्वंति अतो मार्गलेनापिनद्दंदंत्येवेत्य

र्थः यद्वा अप्यर्थे हि शठ्ः अपश्यंतोपि विविंत्स्वेति किं काक्वा नैवेत्यर्थः भवतीभिस्तेषामुपेक्ष
णात् अतो बंधुभ्यो भयं मा कुरुतेति कुसुममिलनमित्यादिविशेषणैर्दृश्यतोक्ता यद्वा ईष
न्मृगणयकोपतो वनावलोकनेन दृष्टं वनमित्युक्ते ऊर्ध्वावलोकनेन वराकेशकरैरंजितमित्युक्ते
कालिंदीतीरावलोकनेन तु यमुनेत्युक्तमिति विवेचनीयं। तत्र यमुनेति शोभंत लीलेति माद्यं वनसा
कुसुमितत्वेन स्वत एव सौगंध्यमित्यनिलस्य गुणत्रयं अन्यत्रै स्थैर्जितं यद्वा ननु महामोहनवा
क्याद्यतिक्रमेण तेऽस्माभिरुपेक्षिता एवेति भयमिति चेन्न हि नादृश प्रयत्नेन रात्रागमनस्य किं
नाम प्रयोजनमिति सकैतवं हसनं ध्यात्वा आह्लातं २ दिष्ट्या २ दृष्टं चंद्रिकायां रात्रौ मदीय श्रीवृंदा
वनशोभानिरीक्षणार्थमागतमिति भवतु तत्र संपन्नमेवेति संमानतं अभिनयेनाह य २०

दाष्टरूवंध्याद्यपेतया श्रीवृंदावनचंद्रं श्रीकालिंदीविहारिलीलां चानुभवितुमागतास्म इति कु
तोभयमिति चेत्सत्यं तर्हि परमशोभायुक्तं वृंदावनस्य तत्रोदितचंद्रस्य च तथा सुंदरकालिंदी
विहारिवातगतिलीलायाश्च दर्शनमिदं दिष्ट्या संपन्नमेवेत्यंगुल्यादिना दर्शयन् सलीलमाह
दृष्टं वनं कुसुमितं राकेशकररंजितं यमुनानिललीलैजत्तरुपल्लवशोभितं २१ तद्यातमाविरंगो
ष्ठं शुश्रूषध्वं पतीन्सतीः क्रंदंति वत्सा बालाश्च तान्पाययत दुह्यत २२ अर्थः सएवावस्तुतस्तु सात्ता
त्तथा तादृशवनादिप्रदर्शनेन भावमेव विवर्द्धयति श्लेषार्थश्चायं एतत्पदे दृष्टमिति द्वाभ्यां ई
दृशं सर्वगुणयुक्तं वनं दृष्टमेव तत्तस्मात् घोषं मा यात तस्यान्वयः यद्वा एतादृशे वने सात्ता दृष्टेपि
रात्रौ विलंबनमयुक्तमेवेति तद्योग्यं यमुनातीरं प्रयाम इति तत्तस्माद्वनशोभादर्शनेन

श्री
वृ॰टी॰
२८
28

निजमनोरथस्मरणात् सदोच्चैर्गीतं दधिमन्थनगवादिशब्दैर्घोषयति शब्दायते इति श्लेषेण सर्वेषां सर्वदूत्तरं घोषयतीति घोषस्तस्मिन् गोपा वा संख्यातं माचिरं त्वचिरादेवेत्यर्थः यद्वा तत्र विलंबं मा कुरुतेत्यर्थः किमर्थं पतीन् शुश्रूषध्वं सेवयध्वं कुतः सतीः हे सत्यः अन्यथा साध्वीत्वभंगापत्तिः अतो मत्यार्थं युष्माकमवस्थानमप्ययुक्तमिति भावः ननु परमसेव्यत्वं त्वं सेवामसहमानाः सर्वदाः स्वपापं नो दुष्टतरालस्माभिः परित्यक्ता एव सतीत्वमपि त्वत्पादाब्जयोर्निर्मञ्छनीकृत्य दूरतः क्षिप्तमित्याशंक्याह सकरुणं पद्यांतरमाश्रयन् वत्सादिषु स्नेहं जनयति क्रंदंतीति अतस्तान् बालान् पाययत दुग्धं वत्सार्थं च दुह्यत दुग्धदुग्धं गा इत्यर्थः वत्सेभ्यो बालेषु स्नेहविशेषात्तेषां पश्चान्निर्देशः एवं सर्वत्र निवर्तनार्थं पूर्वपूर्वस्माद्वाक्यादुत्तरोत्तरस्य गरिष्ठत्वं ज्ञेयं पायय २८

तेन्यस्यांशा तु क्लिस्तस्य दुःनमवहृपकार्यत्वात्‌ यद्वा गोपवृन्दामणे वत्सान्‌ गोपैर्गोदोहने न पाययि
ष्यन्त्येव न्यतश्चाह वालांश्चेति तेषां पुष्टान्‌ विना दुग्धपानासंभवात्‌ यद्वा नान्‌ वत्सान्‌ वालांश्च
पाययन्त पयः कथं न दोहदुह्यन्त गाः गोदोहने स्तन एव वत्सानां वालानां च तद्दुग्धस्यैव पानं भावी
त्यर्थः अत्रेदं तत्वं श्रीकृष्णैक एया भगवत्यस्ता ब्रह्मदेव्य कश्चिज्ज्ञात विवाह्याश्चपि नाममात्रेणैव प
तिमन्यो विविधव्याजेन पतीन्‌ वंच यमानातालैः सहांगसंगाभावेनानानापत्याएव केवलं पत्यादीनां
मायहेतु निजकौतुकविशेषेणवानास्त्येव काश्चित्पर पुत्रान्‌ पुत्रबुद्ध्यां पालयंतिस्मेति स्वतस्त
न्याभावेन तान्‌ गोदुग्धमेव पाययन्तीति वस्तुतस्तु सर्वमेतद्ब्रह्ममोहेनैव अतएव सन्तीरिति श्लोक
ये श्चायं तत्र स्माहं धुसाधसाभावात्‌ वनशो भारति सामग्रीसद्भावाच्च अचिरं शीघ्रमापान ॥

श्री. ह॰ टी. २९
29

यदियाय तदाविलंबेन राज्ञं तत एव यास्यथेत्यर्थः यद्वा चिरंचिरं तत्र नः अस्मानं आदि दुःखप्रदत्वे
न च कश्चोनुभूतो यो घोषसंमायायान चकारान्माशवृस्याग्रेपि सर्वत्र संबंधः पत्नीवृ माशुश्रूषध्वंसती
श्च साध्वीर्मा शुश्रूषध्वं न सेवध्वं तत्पदवीमपि न यातेत्यर्थः स्नानं आदि स्नुखभंगादि तिन मैव वत्सा
दयोन क्रंदंत्येव गोपादिभिर्गोदोहनादिना पयः पानसिद्धेः अतस्तान्न पाययिष्यथ न तु धोत्त
येन्यत्र कन्याभावेन स्नानं त्रां स्वचितं अथवा मदभिस्नेहाद्भवं त्योयंत्रिताशयाः आगताह्युपपन्नं
तन्नृप्रीयंते ममजंतवः २३ मयियोभिस्नेहः प्रीतिविशेषः तस्मादितिमधुरप्रेमाख्यस्त्रीपुंभाव
विशेषोनिरस्तः अत एव सौदास्यमाह हियतः सर्वेपि प्राणिनो मयि प्रीतिं कुर्वंतीति मदभिस्नेहा
दितिसांत्वातुक्त्वा तमपिस्पृहयति अत एव गौरवेणभवत्यइति यद्वा ननु एयं एवद प्रवरत २९

ह्यस्माकमभीष्टं संपादयन्तां तत्राणां प्रीतिमेव कुर्वन्तीति प्रीतिर्भक्तिविशेषत्वादेगसंग कार्यमेण
लमितिभावः अन्यैर्न्नैर्व्यजितं यद्वा अहोवत परित्यक्ताएवते सर्वे न तु किं पुनस्तत्रामयग्रहणेने
त्याशंक्य सश्लाघं पठन्तां तस्मात् अथवेति अर्थस्तथैव यद्वा मम योयुष्मास्वभिन्नेहस्तस्मात्ते।
नेत्यर्थः अकारप्रश्लेषणं अयं त्रिताशयाः परमसाध्वीत्वात् यद्वा मद्विषयकाभिन्नेहे नायं त्रिता
शयाः पातिव्रत्येन परपुरुषस्नेहविशेषायोगात् एवमुभयथाभावविशेषो निरस्तः तथाप्याग
तायत् अन्यत्समानं वस्तुतस्त्वेवमौदासीन्यं चातुर्यभंग्या भावविवर्द्धनार्थमेव श्लेषार्थश्चायं
ग्रहोपरमानुरक्तास्वपि भवतीषु किमुद्दीपनगर्भैः प्रार्थनैरित्याह अथवेति अभिशङ्केन स्नेह
स्य सम्यक्त्वोक्त्या मधुरमेवैतद्वचने सामान्यतः सर्वेऽपि प्राणिनो मम प्रियं ते यतः अतः सर्वो

श्री
रं टी
२
30

नमात्रजनस्तुरघ्यो भवन्त्यो मदभिस्नेहार्यं ञ्जिलाशया वशीकृत न विन्ना: सन्त्य: किंवा पत्न्यादिभयेनास्त
स्कंदाग्रपि मदभिस्नेहाड्डेनो रागता यत् ननु पपन्नमेव सर्वतो विशिष्टमद्विषयक प्रीतिमत्वात् ॥
ग्रनएव प्रेमादरेण भवन्त्य इति ग्रतो धुनामयासह स्कंदेर मद्यग्मिति भाव: भर्तु: शुश्रूषणं
स्त्रीणां परो धर्मो ह्यमायया तद्बंधूनां च कल्याण्य: प्रजानां चानुपोषणं शुश्रूषणं धर्म: सवध
मायया शुद्धभावेन धर्मैकापेक्षया वाचेत् परउत्कृष्ट: हि निश्चितं तद्बंधूनां श्वश्रूश्वसुरादीनां
शुश्रूषणं तथा प्रजानां पुत्रभृत्यादीनां अनुपल्यादिभि शुश्रूषणा नैतरं पोषणं च धर्म एव श्रमा
यथाचेत्परएव चकारात् भर्त्राद्वयोरपि सुख्येन योसा स्मामपि स्तच्यते कल्याण्य: हे साध्व्य: तदे
वयुष्माकमनुचितमिति भाव: यद्वा हे शुभा ईदृष्टवन्त्य: ग्रतो युष्माकमेव तत् सिध्यतीति भाव: २

एतच्चकैतवेन प्रोत्साहनं यद्वा जनैः प्रीयंते नामाकिंवा आगतायन्न युक्तमेव किंतु पर
मधर्मेणैवाहलभ्येयं तत्वन्यथेतितमेव ह्रितामुद्दयावोधयन्नाह भर्त्तुरिति अर्थः स एवाव
स्तुतश्चार्थ्यो योपहासएव तस्यपरमधर्मत्वाभावात् द्वितीयपक्षेपिनर्मैव तत्कीहतचतु
र्वर्गश्रवणादिभक्तिसाध्येत्रैमैकलभ्यस्यतस्यपतिशुश्रूषणबाह्यधर्मेणलभ्यत्वात् अतस्तस्य
धर्मस्यपरत्वोक्तिरपिनर्मएवेति अतएवोक्तं गीतादौ सर्वधर्मान्परित्यज्येत्यादिश्लोकार्थश्चा
ये कल्याण्यहे महाभाग्यभाजः नकेवलं भर्त्तुन तद्बंधूनां मद्विधानां च शुश्रूषणमभीष्टस्त्रीणां द्
र्येपरोधर्मः यद्वा वृषादिभ्योगोपादिरक्षणन्यायात् कृमेवात्रत्यानां सर्वेषां भर्त्ता तस्यकिं
वक्तव्यंभर्त्तुर्मम शुश्रूषणमिति मद्बंधूनां श्रीव्रजेंद्रबलदेवादीनां च तत्शुश्रूषणं तथाप्य

श्री॰
द॰टी॰
३१
31

ज्ञानां मन्यरिजनानां स्तुवलादीनां व्रजेंद्रगृहदासीनां वा अनुपोबलमपि परधर्मः अतः शु
द्ध भावेन मम सेवा क्रियतामिति भावः किंच श्रीभागवतारसोपयुक्तेर्थे प्रयुक्तामपि वाच्यं बह
वोर्था अनुवर्तंते नत्रैश्वर्यरूपोयमर्थः स्त्रीणां अस्यासां प्राकृतयोषितामेव धर्मः न सर्वेस्वीव
गवरिष्टानां लक्ष्मीप्रार्थ्य सौभाग्यानां युष्माकं भक्तौ प्रवृत्तानामपि धर्मानादरात् नच्चोक्तं
त्यक्त्वा स्वधर्मं चरणांबुजं हरेरित्यादिना एतत्तु हरिभक्तिविलासे एकादशीलक्षणादौ बहुशो
विवृतमेवास्ति यद्वा भर्तुर्जगद्गुरोर्मम यद्वा धर्मरहस्यसारसर्वस्वं शृणुतेति परमार्थमे
वनर्मणोवाह भर्तुरिति त्रिभिः व्रजस्त्रीणां युष्माकं भर्तुः शुश्रूषणं अधर्मः पापं अमाय
यातु परोधर्मः महापापमेव भक्तिपराणां श्रवणादिभक्तिरूपस्वधर्मपरित्यागेनव ३१

त्रिसेवनादि परमधर्मप्रवृत्त्यामहानर्थोत्पत्तेः तथा चोक्तं गीतासु स्वधर्मे निधनं श्रेयः परधर्मो भ
यावह इति यद्वा प्रकारो विष्णुरहमेव तस्मिन्नपि मायया भक्त्यादित्यागेन वंचनया यत्र भर्तुः
शुश्रूषणमपि भगवद्भक्तिहीनानां सर्वकर्मणो वैफल्याद्वैपरीत्याच्च तथा चोक्तं बृहन्नारदी
ये किं वेदैः किमु शास्त्रैर्वा किं वा तीर्थनिषेवणैः विष्णुभक्तिविहीनानां किं तपोभिः किमध्व
रैः स्कांदे च रेवाखंडे धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत पापं भवति धर्मोऽपि तवाभक्तैः
कृतो हरे इति एतच्च भक्तिविलासे वैष्णवमाहात्म्यादौ प्रसिद्धमेव ननु परोपदेशपंडितसर्वे
ष्वा एतयः परित्यक्त एव अधुना किं तदीयशुश्रूषाद्युपदेशेन तत्राह दुःशीलो दुर्भगो वृद्धो
जडो रोगी अधनोऽपि वा पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥ ॥ चौर्यादिरतः दुर्भ

गः भाग्यविहीनः निष्फलोद्यमः इत्यर्थः वृद्धो जरयाभिभूतः जडः कर्मादिषु सामर्थ्यविहीनः
रोगी महारोगग्रस्तः अधनः अतिदरिद्रः निजोदरभरणेप्यसमर्थ इत्यर्थः अपि शब्दस्य
श्री ह प्रत्येकमन्वयः दौःशील्यादियुक्तोपि न हेयः व्रजवासीषु सर्वसद्गुणयुक्त एवेति कथं त्याज्यः
३२ स्यादित्यपि शब्दार्थः लोके प्रभुभिः लोकदृष्ट्यापेक्षावतीभिः अन्यथा इह लोके दुःकीर्त्या
32 दिकं परत्र च नरकादिकमित्यर्थः तत्र च महापापपरतः परित्याज्य एवेत्याह अपातकीति।
तथा च स्मृतिः पतिं च पातितं भजेदिति अतो त्वया नास्वैषामप्यपातकित्वात्प्रहातुं यो
ग्य एवेति भावः वस्तुतस्तु पश्चात्कस्यचित्कुतोपि धर्मादिविचारेस्मिन् स्वविषयकभा
वविशेषशैथिल्यं संभवेदिति तन्निरसनेन स्वयमेवादौ धर्मश्रावणेन तासां भावो दृढीकृत ३२

इति इदमपि सर्ववन्नर्मैव नन्वज्ञजनापेक्षया सौशील्यादिगुणयुक्तस्यापि पत्युर्हेयत्वा
न्नतन्निरूपितमेव स्वेष्टार्थस्यायं न्यायः पातीति पतिः रहं गुदैः शील्यादियुक्तोपि सन्नु
न थास्वपा नकीयस्मादयतितोपि सन्न लोकवद्ध्ये पशुभिरपि पतिपुत्रादिभिरपि वा स्त्री
मि – जांगनाभिर्युष्माभिर्न्न हानुयोग्यएव किंनु आलिंगनादिना सदा संगम्य एवेत्यर्थः
अहं तु ननाद्दशो भवाम्येव सर्वसद्गुणत्वेन युष्मदेकप्रियत्वेन च तद्विपरीतत्वात् स्वयं च म
द्येक्षया लोकानपेक्षिका एव नदधुनापि कथं नालिंग्येयेति भावः यद्वा प्राकृतेन स्वाकृतशब
द्वैषयुक्तोपि पतिर्न्न हेयः अहं तु न[illegible]तः पतिरेव साक्षात् षड्गुणैश्वर्य्ययुक्तश्च कथं हेयः
स्याभिति सर्वत्यागेन युष्मयमागताय ` ` नतु पपन्नमेव यद्वा लोके पशुभिरेव न हातव्यः

परमार्थैकप्रभुभिस्तु सौशील्यादियुक्तोपि अपात्रकोपि हातव्यः भवत्यस्तु मयि परमानुरा
गात्कृष्टत्वाल्लोकद्वयमर्यादां त्यजन्त्येवेति भावः तत्र सिद्धान्तोऽभिलिखित एव यद्वा गोपेभ्यो
श्री· २ भयस्त्वयत्राह स्त्रीभिर्व्रजस्त्रीभिः अपात्रकोपि दुःशीलादिरूपः पतिर्न हातव्योऽभगंतव्यः प
२२ तिः ईदृशदुर्गुणादिव्यस्वरूपं दुःशीलः क्रोधनः दुर्भगः कुरूपः वृद्धः जीर्णः जडो मूर्खः रोगी
33 सदाव्याधियुक्तः अधनो वा गोधनहीनः लोके प्रभुभिः सदा लोककामाभिः ननु श्रीव्रज
युवराजभवदाज्ञया नैव पतयस्त्याज्याः किंतु सदा नाम्नैव नेयां पति त्वं पतिव्यवहारस्तु
त्वया सह हे वामाभिन्याक्षि कथनासां दीर्घा भीष्ट त्विं दनेन परमात्प्रियमनवहित्य यासामभेद
यमिवाह अस्वर्ग्यमयशस्यं च फल्गुकृच्छ्रं भयावहं जुगुप्सितं च सर्वत्र अपपत्यं कुलस्त्रि २२

व्यभिचारी ननु परस्परमासक्त्या वैदग्ध्यप्रकटनेन रतिः संपद्यते न च तस्यात्मारामत्वादिना न घटेत योगश्चित्तैकाग्रता
तस्य स्वस्वरूपवशीकृत योगः सनकादयस्तेषामीश्वरोपि आत्मारामोपीति विचित्रवैदग्ध्यप्रकटनेन योगनिष्ठा आत्मा
रामता च तदानीं नस्थितेत्यर्थः पूर्ववत् विकल्पितेन योगेश्वरेश्वरता रमणे न चात्मारामताऽपगतेति विवेचनीयं अन्यथा तत्स्वरूपेण
रमणासंभवः योगे त्वपने नैकोपि बहुरूपः सन्निव पृथक् पृथक् युगपद्रमयामासेति सूचितं अन्यत्तुल्यं रमणप्रकारमेव ताभिरित्या
दिभिश्चतुर्भिर्वर्णयन् आदौ ताभिः सह प्रेमसंभ्रमेण तस्यापि शोभाविशेषं सदृष्टांतमाह ॥ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणो
त्फुल्लमुखीभिरच्युतः उदारहासद्विजकुन्ददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः समेताभिरन्यांतां निकं गताभिः एतेन प्रथममुक्ति
प्रत्युक्ति समये तासां मध्ये श्रीराधा नासीत् किंतु कृष्णस्यावहित्थ्यापगमे जात एव सा मिलितेति ताभिर्वृतः परितो वेष्टितः सन् ६५

अच्युतः कामादिभिरनिर्जितोपि तथास्वविग्रहः अनिर्जितेवाच्युतास्थितेति यद्वा कथमपि कस्यापि श्रीशोभापानच्युत इत्यच्युतोपिय
दारसप्रसरात् कथमपिनच्यवतेइत्यप्रेमरसपूर्णतोक्ता अतएवविशेषेणारोचत अशोभत समेतत्वेहेतुः उदाराणिरस
विशेषोद्दीपनविचित्रवैदग्ध्यादिमयत्वेनसर्वोत्कृष्टानिपरमसुखप्रदानिवाचेष्टितानिस्पर्शनपुष्पाद्यर्पणैकदत्तादिरूपाणिय
स्यसः यद्वाप्रहस्येतिपूर्वोक्तोहेतुस्तत्रविराजतएव यद्वाप्रहस्यारीरमत् रंजयामास रतेरागात्मकत्वात् तथाचविश्वः रतिस्म
रपूयायांच्चरागेचसुरतेरतिरिति अयमेवसंगतोहेतुः ततश्चउदारचेष्टितइतिवक्ष्यमाणरमणोपकरणं विरोचनकारणंच
ज्ञेयं अतएवपृथयस्पर्द्धेक्षणं स्वकर्तृकंतत्तत्कर्तृकंवा एवंशक्तिविशेषेणैश्वर्यमपिदर्शितं परितोवर्तमानास्ताः प्रीतिसाम्येनयुग
पदीक्षणात् उत्फुल्लशब्देनमुखस्यकमलत्वंईक्षणस्यचभास्करत्वंव्यंजितं एवंतासांरसविशेषप्रकाशउक्तः तस्यापितमाह
उदारेहासेद्विजेषुचकुंदपुष्पवद्दीधितिर्यस्यसः एवंहासस्यचमधुरतादंतानांचशुभ्रकांतिरुक्ता यद्वा उदाराहासेद्विजकुं
दानांदीधितिर्यस्य यद्वा उदारोहासोययासाद्विजकुंददीधितिर्यस्य इतिश्रीमद्दंतानांप्रकाशेनहासस्याधिकशोभोक्ता:
स्वतः परमकाष्ठाप्राप्तनित्यशोभामयस्यापिताभिः शोभाविशेषंदृष्टांतेनसाधयति एणांकइतिपूर्णचंद्रस्ताराभिः सर्व
तोविराजमानाभिः सतीभिर्वृतःसन्यथाविरोचेत नद्वदिति एवंताभिःसहतस्यान्योन्यंशोभनत्वंप्रेष्ठत्वंनित्यसाहि
त्यंचसूचितं एवंशोभाविशेषोदयेनश्रीवृंदावनमपिशोभयन् गीतेनपुष्पादिप्रदर्शनेनचभावमुद्दीपयितुं किंवार

तियोगपयमुनापुलिनं गंतुंगमनक्रमेणएव प्राहेत्याह ॥ उपगीयमानाउ इत्यत्र वनिताशतयूथपः मालांबिभ्रद्वैजयंतींव्य
चरन्मंडयन्वनं ॥ रूपगुणलीलादिवर्णनेन स्तूयमानः यद्वा वकृधातु कीर्तगानेन उपचर्मुपार्श्वे बुगीयमानः अतो हर्षे
66 णोच्चैर्गीयन् वनिताः जनितात्मंतानुरागाः सीमंतिन्यः तथाच विश्वः वनिताजनितात्यर्थानुरागायां च योषितीति तासां श
तानि यूथानि पातिसर्वदुःखाद्रक्षतीति यद्वा पिबतिपिबन्न इव चक्षुर्भ्यां मित्यादिवत् आसन्नासेवते यद्वा अधरामृतपान
दिना साक्षात् पिबतीति वेति तथासः तासां निजनिजजात्यानुसारेण वर्गशो यूथत्वं तत्र श्रीनित्यप्रियाः काश्चित् काश्चिन्नं श
भूता देव्यः याउद्दिश्य पद्मश्रीवल्लभादिवं संभवंतु सुरस्त्रिय इति काश्चिच्च प्रोढसाधनैर्भाव विशेषसिध्या व्रजाकिशोरी त्वं प्रा
प्तास्ताद्विविधामुनयः श्रुतयश्च दंडकारण्यवासिनो मानससरस्तीरमहातपस्विनश्चेति काश्चिच्च मुनयः काश्चिच्च महोप
निषदाद्याः श्रुतय इति तत्र ह्रत्तंपद्मवृहद्वामनादौ व्यक्तमेव तत्रैव भावविशेषेण वांतरभेदं प्राप्ता इत्येवं विभागशो वृत्तेना
नाश्रपि सर्वासां प्रायो भावसाजात्यात् सर्वा एवता- साम्येन रमयामासेत्यर्थः वैजयंतीं पंचवर्णपुष्पग्रथितां पंचवर्णा वैजयंती
तिवचनात् नवरत्नखचितामिति केचित् यद्यपि रिरंसया पूर्वं धृतान्यन्यान्यपि भूषणानि विद्यंते तथाप्यग्रे वक्ष्यते
वलयानां नूपुराणां किं किणीनांच योषितां सप्रियाणामित्यादि तथापि तां बिभ्रदिति राज्ञेतयाशोभाविशेषाभिप्रायेण
किंवाताभिः सद्यस्तत्रैव विरचय्य समर्पितत्वात् व्यचरत् परिबभ्राम: ततः श्रीयमुनापुलिने तानी लावैदग्धी विशेषप्रकटने

नरमया मासेत्याह ॥ नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकं रेमेतत्तरलानंदकुमुदामोदवायुना ॥ नद्याः कालिंद्याः पुनः पुलिनमाग
त्यकालिंद्याइति वर्त्तमानत्वात् तस्याश्च वनस्य च नामाग्रहणं त्वनयोः प्रसिद्धत्वेन तयोरन्यापि सुबोधत्वात् यद्वा निर्जनत्वमात्रापेक्षयाव
नत्वेन तस्य प्रवाहत्वेन च पुलिनोऽत्र मत्त्व मात्रापेक्षया नदीत्वेनैव तस्योक्तिः गोपीभिः सह आविश्य प्रीत्या प्रविश्येत्यर्थः हिमाः
शीतला वालुका यस्मिन् तत् इति श्रमापनोदनत्वेन कोमलत्वेन च मनोरमता तस्य दर्शिता तस्या नद्यास्तरलैस्तरंगैरानंदीसु
खविहारी वा सोऽकमलामोदयुक्तवायुस्तेन यद्वा तत्तरलैरानंदी रात्रौ मुद्रितानामपि कमलानां कंपनेन प्रकाशमानः सुखका
रको वा आमोदो यस्मिन् वायौ तेन जुष्टं सेवितं कुमुदेति पाठः केषांचित्संमतः तरंगसंबंधेन शैत्यं आनंदीत्यनेन जुष्टमित्यनेन
वा मांद्यं सौरभ्यं च व्यक्तमेवेति गुणत्रयमुक्तमिति सर्वथा पुलिनस्य रतियोग्यत्वं तेन भावोद्दीपनत्वं चोक्तं वाहुप्रसारपरिरं
भकरालककोरुनीवीस्तनालभननर्मनखाग्रपातैः क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिं रमयांचकार वा
हुप्रसारादिभिरुत्तंभयन्निति सहजलज्जादिनाच्छाद्यमानमपि प्रकाशयन् यद्वा प्रेमविशेषविलासरूपत्वेन वर्द्धमानमेवाध
नाविशेषतो वर्द्धयन्नित्यर्थः अत एव रतेः पोषणेऽक्रूरतेः प्रेमलक्षणयाः पतिं पालकमिति तथा रतिपतिमिति दाग्ध्यांगस्यापि
कामस्य रतिसुखार्थं पुनर्जननेनैव सामग्र्यमभिप्रेतं इति रतौ तस्यासक्तिवैदग्ध्यं च परमा दर्शिता तत्र वाहुप्रसारो दूरस्थानसमा
कर्षणार्थं प्राक्परिरंभानुकरणं वा यद्वा तासामेव वाहूनां प्रसारणं यद्वा वाहुप्रसारेण परिरंभः गाढालिंगनमित्यर्थः क्ष्वेलिः
प्रस्तोभनादिरूपा अधरपानदंशनादिरूपा वा व्रजसुंदरीणामिति तासामपि तादृशमेव वैदग्ध्यं सूचितं अन्यथा तस्य तादृशी वैद

ग्धीप्रकाशनासंपत्तिः रमणं च निजशक्तिमाधुर्यविशेषेणान्योन्यमलक्षितं युगपदेव वृत्तेयं अथ नौप्रेमविशेषोद्रेकेण क्रीडा
विशेषार्थी विप्रलंभरूपरसविशेषं वक्तुमारभते एवंभगवतः कृष्णाल्लब्धमानानां महात्मनः आत्मानं मेनिरे स्त्रीणां मानिन्यो
न ४ भा ऽधिकं भुवि ४१ उक्तवैदग्धीविशेषप्रकटप्रकारेण महात्मनः आत्मारामादपि लब्धोमानः संमानः चित्तसमुन्नतिलक्षण
67 भावविशेषो वा याभिस्ताः तत्र हेतुः भगवत इति रसविशेषानुभवार्थं निजभगवत्तामाधुर्यप्रकटनादित्यर्थः अत एव कृ
ष्णात् विचित्रमहारसार्णवात् परमचित्ताकर्षाद्वा अतो मानिन्यः सत्यः भुवि वर्त्तमानानां स्त्रीणां मध्ये आत्मानं अभ्यधिकं
श्रे: परमश्रेष्ठं मेनिरे यद्वा भुवि विहारभूमौ विति सर्वासां साम्यमेवाभिप्रेतं तथापि स्त्रीणां तासामेव गोपीनां मध्ये प्रत्येक
मात्मानमभ्यधिकं मेनिरे तथा रमणात् अतो मानिन्यो पि वभूवुरिति पृथक् वाक्यं वा मदमानयोर्वद्धमानत्वात् वस्तुत
स्तु परमविदग्धानां तासां विदग्धवरप्रियसंतोषार्थपर्यवसानात् रसविलासस्वभावकृतं सेवाविलासरूपमेव तद्द्वयं ता
सां तत्सौभगमदं वीक्ष्य मानं च केशवः प्रशमाय प्रसादाय तत्रैवांतरधीयत ॥४२॥ तेन निजवैदग्धीभरेण यद्वा उक्तेन अ
हमेवानेन रमितेति तिरमणप्रकारेण सौभगं सौभाग्यं तेन यद्वा तेषां प्रीत्यर्थकमपि सौभगेन मदं वीक्ष्य तस्य प्रशमाय अ
न्यथा स्वाधीनत्वाभावेन निजेष्टरासविलासासिद्धिः मानं च वीक्ष्य प्रसादाय मानरूपकेलिनासंतोषात् प्रसादविशेषं
कर्त्तुं अंतर्द्धानं विना रासार्हप्रेमविशेषासंपत्तेरिति विवेचनीयं यद्वा मदमानयोः प्रशमाय प्रशमः किमर्थं तदाह प्रसादाये

त

ति रासेन रंजनविशेषाय यद्वा अंतर्द्धानद्वारा न पारयेऽहं निरवद्यसंयुजामित्यादिना वक्ष्यमाणेन निजर्दृष्टीनतातिशयविज्ञापनरूपाय य
द्वा तस्मात्पत्नीभंगं तेन मदः मत्तताहर्षो वा तथा च विश्वः मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोरिति तद्रूपं मा मम मा नस्तो
ल्लासविशेषं वीक्ष्य अत एव प्रशमः प्रकृष्टः शमः सुखं रासक्रीडात्मकं तस्मै प्रसादाय च अंतर्द्धानेपि तदपरित्यागतर्द्धानविशे
षाद्यनुरंजनाभिव्यंजनाय नन्वाग्रे व्यक्तं भावि यद्वा प्रशमाय सुखाय यः प्रसादस्तस्मै अन्यत्समानं एवं सर्वेषानु
रंजनविशेषार्थमेवांतर्धानं नत्वात्मारामत्वादिनाऽसूयया चेति ज्ञेयं विदग्धवर्यासु विदग्धशिरोमणेस्तथैव व्यव
हारौचित्यात् अत एवाग्रे नाग्रे वक्ष्यते मयापरोक्षं भजता तिरोहितमित्यादि तत्रैवेति साक्षात्कृत्वाप्यगमनात् अ
कस्मादेवादर्शनाच्च तच्च तस्याशक्यत्वं नस्यादित्याशयेन परमेश्वरत्वमाह केशव इति॥ ॥इत्यनुवंशः॥ ॥तदंतर
धानकथनेन श्रीबादरायणेरप्यार्तिभरोदयात् कथाविच्छेदेन मध्येऽध्यायापातः श्रीशुकः शुक वाचेति श्रीभगवदं
तर्धानेन तस्यापि शोकोदयात् शुकवदव्यक्तमधुरोक्तेः एवमग्रेऽपूर्वं ॥ लक्षणं त्वस्य सन्नु विलपन्निवाह ॥ श्रीशुक उवाच॥
अंतर्हिते भगवति सहसैव व्रजांगनाः अतप्यंस्तमचक्षाणाः करिण्य इव यूथपं १ सहसैवांतर्हिते इति अंतर्द्धानस्य
प्रकाराद्यतर्कणात् अतर्किते तु सहसेत्यमरः अयं तापाधिक्येऽपि हेतुरुक्तः व्रजस्यांगनाद्रतितासांतदेकप्रियत्वेन विरह
तापस्यौचित्यमाधिक्यं च अभिप्रेतं यूथपं मत्तगजेंद्रं करिण्य इवेति रसविदग्धो हि गजः इत्यादिवचनानुसारेण तदेका

लंवनत्वेनैवाता संतादि छेदनापाधिकोदृष्टांतः तापमेवाभिव्यंजयति गत्येत्यादिनापद्याधिकाध्यायद्वयेन ॥ गत्यानुराग
स्मितविभ्रमेक्षितै र्मनोरमालापविहारविभ्रमैः आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ताविचेष्टाजगृहुस्तदात्मिकाः ॥
68 कायकीचेष्टा सर्वा उपलक्ष्यते अनुरागेणस्मितंविभ्रमेक्षितानिचतैर्मानसी तेषामनुरागकृत्वात् मनोरमैरालापा
दिभिः मनोरमालापेनवाचिकी मनोरमाविभ्रमैरश्विविधैव तत्तत्समुचितत्वात् विहारो गोवर्द्धनोद्धरणादि
लीलावेणुवादनादिर्वाविभ्रमः शृंगारचेष्टा तथाचोक्तं चित्तवृत्त्यनवस्थानं शृंगाराद्विभ्रमोमतः इति एवं
यथोक्तैरन्यैरुक्तैः पूर्वाचरितैराक्षिप्तचित्ताः ततश्चतदात्मिकास्तन्मय्यः सत्यः तदात्मिकास्वबभूवुरितिपृथक्
प्रकृष्टमानाभिप्रायेण यद्वा प्रमदोहर्षः आनंदरूपश्चपरमात्मा सत्ति इतिभावः रमायालक्ष्म्याः पत्युरि
तिपरमवैदग्ध्यं तयाचगत्यादीनामुत्तमतापिसूचिता यद्वा रमाश्रीराधेतिपूर्ववत् इतिवक्ष्यमाणेन तत्साहि
त्यं सूचितं तास्ताः परमानिर्वचनीयाः इतितदनुकरणस्याशक्तित्वमुक्तं तथापिजगृहुः यद्वापूर्वोक्ताः सर्वा
विविधचेष्टाः अयंचप्रेमविलासोनागरीणांस्वाभाविकएव अतएवप्रियानुकरणंलीलेतिनाट्यशास्त्रे
लीलेत्युच्यते यद्वातास्ताविचेष्टाः हृल्लस्यतास्तालीलाः कर्त्र्यः प्रमदाः कर्मभूताजगृहुः कथंभूताः प्रमदाः
तदात्मिकाः तच्चित्ताः तत्रतदात्मकत्वमभिव्यंजयति ॥ गतिस्मितप्रेक्षणभाषणादिषुप्रियाः प्रियस्यप्रति ६८

रूपमूर्त्तय: असावहं चित्यवलास्तदात्मिकाम्यवेदिषु कृष्णविहारविभ्रमा इ गत्यादिषु उक्तेषु आदिशब्दाद्विहारवि
भ्रमो उक्तानुवादित्वेन पूर्वोक्तत्तद्विशेषणान्यनोक्तानि प्रतिरूपलीलाभिरामूर्त्तय इंद्रियांगादिसंघातमकदे
हाया सांता: इत्यंतर्बहिस्तद्भावापत्तिरुक्ता तथा चोक्तं प्रबुद्धादेन तद्भावभावानुकृताशयाकृतिः अबलाः स्त्रियः
इति स्त्रीचेष्टानुकरणमेवयुक्तमितिध्वनितं तथापि यद्वा तापभरेणाशेषबलरहिताः सत्यः तु एव अहमेवा
सावितिप्रत्येकं सर्वान्यवेदयंत: इति विरहविवशतोक्ता लीलाविष्टतायां तत्र हेतुः तदात्मिकास्तन्मय्यः सत्य
इति तच्छब्देन श्रीकृष्णस्तद्वत्साद्भ्यो वा श्रीकृष्णोहमिति सा तादात्म्यनुक्तिः विरहवैवश्यात् तदात्मकत्वादेव
वा तन्मयत्वं च प्रेमलीलाभरस्वभावेनैव न च भेदज्ञानादिनेत्याशयेनाह प्रियाप्रियस्येति कृष्णस्येति परमाकर्षक
त्वाभिप्रायेण अन्यन्नैर्व्याख्यातं यद्वा अनुकरणमेवावाप्तिस्तेयं ततस्तत्पूर्वश्लोकेतदात्मिका इति अनुकरणसम्प
न्ना वेदिता: तामेव दर्शयति गतीति हे अबलाः असौ तत्तद्विहारनागरो हमित्येतत्श्रीकृष्णवाक्यमितिशेषः
तत्र पूर्वं नर्मादिना कदाचित्तेनोक्तमस्तीत्यत एव तत्तेयं कुतो वाक्यं न समापितमित्यपेक्षायामाह तदात्मिका इ
ति तन्मनस्का: यद्वा अयमनुकरणसम्पन्नाबोधनार्थं पुनरपि पूर्ववद्धेतुः अत एव कृष्णविहारवद्विभ्रमः चु
बनालिंगनादिचेष्टाविशेषो यासां यद्वा कृष्णस्येव विहारविभ्रमः विगतो हारो येयस्मात्तादृशो विभ्रमो विलासो यासां

यद्वा कृष्णविहार इति विभ्रमो भ्रांतिर्यासां ताः नतिष्ठंतुं शक्नुवंति कृष्ण एवायं विहरतितावातमनुकुर्वतीत्यर्थः वाकस्मात्समायने विरहविक्लव
ते वहेतुर्विभाति यद्वा असौ तत्तत्प्रकारैः वर्हुश्रः श्रीकृष्णेन रमितायासाहमित्यर्थः तत्प्रकाशनं वैदग्ध्याविरहविक्लवतयेव वा
69 तादृशानि वेदने हेतुः तास्मिन् अवाच्ये मरणे आत्मा चिंतयासां ताः अत्यंतदुःखेन मुमूर्षया तन्मयं वेदयन्त्रित्यर्थः अतः कृष्ण
विहारै विभ्रम उन्मादो यासां तद्विलासस्मरणेन परमविक्लवा इत्यर्थः नचैवं केवलमनुकरणं लीलाविष्टतावा किंतु
विरहविक्लवाः सत्यइत्न स्ततोन्वेषयंत्यः पुरोदृश्यमानान्सर्वानेवापृच्छन्नित्याह ॥ गायंत्य उच्चैरमुमेव संहता विचिक्युरुन्म
त्तकवद्वनाद्वनं पप्रच्छुराकाशवदंतरं वहिर्भूतेषु संतं पुरुषं वनस्पतीन् ॥ ४ ॥ उच्चैर्गानं तु प्रतिदूरान्निजार्तिश्रावणार्थं किं
वा गीतप्रियस्य तस्य तेनाकर्षणार्थं किं वा आर्त्तिभरस्वभावादेव एवेति यद्यपि त्यागेन दुःखप्रदत्वेन च तद्गानादिकं न यु
ज्यते तथापि अमुमेवेति तदानीमपि तदेकप्रियत्वं किं वा तदेकमानसत्वमुक्तं संहता अन्योन्यं मिलिताः सत्यः सर्व
त्रसम्यगन्वेषणार्थं किं वा सख्येनान्योन्यमार्त्त्युपशमनार्थं किं वार्त्तिविशेषस्वभावादेव वनस्पतीन् प्रतिप्रश्ने हेतुः
उन्मत्तकवदिति स्वार्थे तद्वाधिके वाकः तेन केशाद्यसंवरणं व्यज्यते तथान्वेषणे प्रश्ने च विचाराभावेनाभिनि
वेशोपि निरस्तः अन्यथा वृक्षेषु प्रश्नानुपपत्तिः वनाद्वनमिति प्रतिवनेन्वेषणेनैतस्तता वहलपरिभ्रमणं तेना

नेककालमन्वेषणमपिसूचितं आकाशोयथावहिरंतर्व्याप्यास्ते तथाभूतेषुसर्वजीवेषुपुरुषंपुरुषरूपेणांतरमं
तर्बहिश्चव्याप्यसंतं यद्वाभूतेषुव्याप्तेषुकुंजादिषुअंतर्बहिश्चस्वनिकटे संतमप्युन्मादादेववृक्षादीन्पप्रच्छुः यद्वा
पुरुषंनिजस्वामिनमितिताद्दशाश्रश्लेमार्गणेचहेतुः यद्वाअहोवत सर्वत्र संतमपिस्वयं तथाज्ञायमानमपिविरहजप्रे
मभरेणैवज्ञानपिनापृष्टवत्यइतिस्वयमपिताद्दशात्म्यीहआकाशोत्पादि अर्थः सएवअहोप्रेम्णःप्रेमार्त्तिर्वैवश्य
माहात्म्यमितिभावः दृष्टोवः कच्चिदश्वत्थप्लक्षन्यग्रोधनोमनः नंदसूनुर्गतोहृत्वाप्रेमहासावलोकनैः ५॥ वोयुष्मा
भिः युष्मदीयोवासंबंधज्ञापनंतद्दर्शनसंभावनार्थं ततः स्नेहेनकथनार्थंच यद्वाप्रेमभरस्वभावएवायं येन
निजभावोऽन्यंस्वसदृशंलक्षीकृत्योच्यते इतिप्रत्येकंपृथक्संबोधनं वैहस्यवत्वेनादरात् तत्राश्वत्थस्यविष्णुविभू
तित्वेनवैष्णवत्वंप्रसिद्धमेव वटेवटेचमांविद्धीत्यर्जुनंप्रतिभूतलवर्त्तिमुख्यश्रीमूर्त्तिप्रसंगेश्रीभगवदुक्तेन्यग्रो
धस्य तथातयोः साहचर्येण प्लक्षस्यापि श्रीविष्णुरुद्रब्रह्मणांक्रमेणाधिष्ठानानीतिकेचित् यद्यपिविरह
विकलतयाउन्मत्तवत्तान्प्रतिप्रश्नात्ताद्दशाभिप्रायोनघटते यश्चासौकुत्रकुत्रापिस्वामिपादैर्व्याख्यातो
स्ति सत्तानिवृत्तिपरेयंपंचाध्यायीतिव्यक्तीकरिष्यामः इतिस्वप्रतिज्ञानुसारेणैवनतुश्रीव्रजदेवीभावानुसारे

ए अतः केवलं पुरतो दृश्यमानानां पृष्टसेवप्रश्नः तथापि पूर्वापरवाक्यसंगत्यर्थं तेषां व्याख्यानुसारेणैव किंचिद्
लिख्यते नंदसूनुरिति निजस्वामिनं पृच्छतीत्येवोक्तयुपपन्ने: किं वा रासिकत्ताद्यभिप्रायेण एवमग्रेपि ननु कि
70 मर्थमस्मो युष्माभिः पृच्छ्यते इत्यपेक्षायामाहुः नोस्मनो हृत्वा गत इति हृत्वेति मनसोपरत्वं व्यज्यते अतो न दृ
ष्टत्वेनागता स्तेचोरं साधून् युष्मान् पृच्छाम इति भावः कच्चिदिति प्रश्नान् तर्हि किं यातामिति शेषः वि
रहविक्लतया वाक्यसमाप्त्यसंभवात् नतश्चान्वेवयतात्सम्यगन्वेषयामः किं वात्र भवद्भिर्दृष्टः सत्सम्प्र
मीयते सोत्र नितिकटेस्तीति: तथाप्यकाम्यवस्ता: प्राणान्निरुध्य रक्षेमेतिभावः यद्वा उन्मत्तकवदित्युक्तेरस्यं ता
र्त्तिविवशा तया पृत्पुत्तरापेक्षाद्यसंभवात्तथैव वाक्यसमाप्तिरितित्ते यं एषमग्रेपि महत्तेम त्वादतेऽस्मान्दृक्तौ: ड्रु
पृत्यवतया न नूनं कथयेयुरिति मत्वान्यान् पृच्छतिकच्चित् कुरवकाशोकनागपुन्नागचंपकाः रामानुजो मानि
नीनां गतो दर्पहरस्मित ॥६॥ कुरवः शोणोम्लानः नागो नागकेसरः किं इतः गतः यद्वा अत्र वर्त्तते पूर्वं दृष्ट इति पृष्टः
अधन्यानां त्वित इति दूरतोपि दर्शनं संभवेत् तथापि न सुलभः स्यादिति निवारण गतस्य सत्त्वेऽत्रैव तत्पदान्यन्विष्यते त्य
तमन्वेषयाम इति भावः ननु मानिन्याः कथं तं पृच्छथ तत्राहुः मानिनीनामिति तूस्मितमात्रेणैव मानो नतिर्हि
तेर केवलमात्मनो वैदग्ध्यीविशेषणैतेनैवास्माकं मानोजनितो न तत्रास्माकमपराध इति किं वा तदानीमेव तात्सिंते

नमानो हन्त । अतएव वान्वेषया मद्गति किं वानादृशामहामोहनस्पविच्छेदेन त्वामपि जीवितुं न शक्नुमइति पृच्छामइतिभावः एते श्रीकृष्णसेवकाः अस्मा कं मानं विज्ञाया सूययान किलकथयेयुरिति निजसुखीभिवमन्यमाना । सौभाग्यविशेषे एव च संदर्शनेसंभाव्य श्रीतुलसीं पृच्छंति ॥ कच्चित्तुलसिकल्याणि गोविंदचरणप्रिये सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेतिप्रियो च्युतः ॥७॥ कल्याणि हे जगन्मंगलकारिणि । परमसौभाग्यवतीतिवा । तत्र हेतुः गोविंदस्य गोकुलेंद्रस्य निजप्रेमाधुर्य प्रकटनपरस्य भगवतश्चरणयोः प्रियेयस्यास्तत्संबोधनं । तयोः प्रियेवा । इतिमहालक्ष्मीतोप्यधिकसौभाग्यं सूचितं बहुलप्रयासेन लक्ष्मीकाम्यरजसो । श्रीकृष्णचरणयोः स्वतः प्रियत्वात् अ आदिरूपकाप्रयोगस्तत्प्रियत्वे नेर्ष्यया अतेऽलिकुलैः सह वर्तमानामपि त्वां विभ्रमत्त पूर्वमेव वैजयंत्यंतर्गतत्वेन अधनेः वा व चित्रमाला दिरूपेण धारयन् अतएव तत्र वातिप्रियस्ते त्वया दृष्टोऽस्तिकच्चित् अलिकुलैरितितस्याः सदामकरंदमयत्वं तेनचस देवापरित्याज्यत्वं तथामत्तानां तेषां झंकारेण निद्र्युत्पसंभवत्वं च सूचितं अतो वश्यं त्वदंतिकमागतस्त्वया दृष्टइ तिभावः अच्युत इतिकदापित्वत्तोनविच्युतोभवतीतितदेवदृढीकृतं श्लेषेण अलिकुलैरितिबहुवल्लभामपित्वां प्रियत्वेन बिभर्तिनचतदेकप्रियाऽस्मात् अतोतिक्रांताः प्रियाः । किंवाअतिक्रांतं प्रियं सर्वमपियेनतथेतीर्ष्यया

सूयोक्तिः सपत्न्यादियं तन्न कथयेत्सखत्विति श्रीकृष्णसेविकां पृच्छंति ॥ मालत्यपदर्शिवः कच्चिन्मल्लिके जातियूथिके प्रीतिं
वो जनयन्यातः करस्पर्शेन माधवः ॥८॥ सत्पुष्प[illegible]णे न श्रीकृष्णस्य दासीमेत्त्वास्नेहेन प्रसेकं संवोधनं वदंतिपूर्ववत्
यातः किमिति तैर्व्याख्यातं यद्वा पूर्ववत्तासां दर्शनं संभावयंति प्रीतिरिति यातः सन्करस्पर्शेनेति पुष्पात्पुष्पाणामु
त्कृष्टानां श्रीहस्तद्वारावचयेनेत्यर्थः अतो पुष्पस्यार्हत्वं तदागमनं संभवेदेवेति भावः श्रेष्ठणो दासीवुतासु नरवदत्त
तिर्नमेणाभिखिता नखैरेव पुष्पच्छेदनात् पुष्पावचयप्रयोजनं वितर्कयंति माधवइति मधुनाम मधुरसेन क्रीडतीति
मधुरसक्रीडार्थमित्यर्थः ईर्ष्योक्तिरियं वस्तुतस्तु मा श्रीराधैव तस्याभूषणार्थमेव तच्च तासां तदनुसंधा
नाभावेपि देवगत्याविरुद्ध प्रकृत्या वास्तवतः सर्वपरिस्फूर्तेः स्वयमेव मुखवान्निः सरस्वतीति श्रीकृष्णस्य तस्या
वादास्यएताः शंकया तं च न कथयेयुरित्यस्मानाप्नान्पृच्छंति चूतेति ॥ चूतप्रियालपनसासनकोविदारजंब्वर्कवि
ल्ववकुलाम्रकदंबनीपाः येन्ये परार्थभविकाय पुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः ॥९॥ चूताम्रयोः रसभे
देन ॥ कदंबनीपयोश्च वर्णादिभेदेन भेदः प्रियालः सालभेदः असनः पीतसालः उत्तमपुष्पफलरहितो
ऽर्कः शिवप्रियपुष्पत्वादत्रोक्तः अन्येपीलुकरीरमधूकनागरंगनालिकेरपूगतालकदलीलवलीवदरी
प्रभृतयः ननु पुष्पान्प्रति तत्कथने नाकिमस्मत्प्रयोजनं तत्राहुः परेति अत्र श्रीस्वामिपादमते भवकाइती ७१

कारहितः पाठः भवेज्जन्मेतिव्याख्यानात् बहुधा लोकः इकारयुतपाठस्तु सर्वत्र दृश्यते ततश्च भाविकं मंगलं अ
भ्युदय इत्यर्थः तथाप्यर्थः स एव तत्रापि यमुनोपकूलादिति परदुःखासहिष्णुता सूचिता श्रीसूर्यनंदिन्यास्त
स्याभ्रातुः श्रीयमस्य पापिलोकदंडाधिकारतः परदुःखासहिष्णुतया वर्तीर्णया: संगेन तादृशत्वा
त् तदुपरवाधिका पद्मपुराणे श्रीयमनामहात्म्ये प्रसिद्धैव यद्वा तीर्थत्वाद्धितेन सततमेव प्रशंसनीयं ननु वंद
नीयमिति भावः ननु स्वयमेव युष्माभिरन्विष्यगहनता मित्याशंक्य निजार्त्तिज्ञापनेन कृपां तनयंस्वः सकाशतयं
माहुः रहितात्मनां विरहहतज्ञानानामित्यर्थः यद्वा आत्माप्रियः श्रीकृष्णस्तत्कानामित्यर्थः अतो मत्तत्प्रा
याः स्वयमन्वेष्टुं न शक्नुम इति भावः पूर्वं सर्वेषु प्रायोदर्शनं पृष्टं एषु च गुणविशेषेण तद्दर्शनस्य निश्चयसंभाव
नया केवलं तद्वर्त्मोपदेशप्रार्थनं एवं निजार्त्तिविज्ञापने नाधिकदुःखोदयविशात याभूमौनिपातात् किंवा पदवीप्रा
र्थनेन पदवीस्मरणोद्भूसोद्यत्विं निधाय तस्याः स्निग्धदूर्वांकुराद्युद्गमरूपं श्रीकृष्णपादास्पर्शजातपुलक
जातं दृष्ट्वा तस्याः परमसौभाग्यं मत्वा परमार्त्ता आहुः किं ते कृतं क्षितितपो व्रतं केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगम
रुहैर्विभासि अप्यंघ्रिसंभवउरुक्रमविक्रमाद्वा आहोवराहवपुषः परिरंभणेन ॥१०॥ केशवेति परमेश्वर त्वं पूर्ववत्
किंवा प्रकृष्टः केशाः संतस्योतिव्युत्पत्त्या परमसौंदर्यं सूचितं विशेषेण भासीति शोभाविशेषेण न त्वहेतुकोत्स

वत्यमभिप्रेतं अद्रेरुत्वादिरूपकाप्रयोगः कोमलत्वादिगुणनैरपेक्ष्येणापि केवलत्वत्तलस्पर्शमात्रेणैव तदुत्सवविवक्षया ईदृ
शउत्सवः केवलमद्रिसंबंधमात्रेण न स्यात् किंतु संभोगेनैवेति पक्षांतरमाहुः आस्ते इति अन्यत्रैवर्जितं यद्वा तादृ
शशोभादृष्ट्वा श्रीकृष्णपादतलस्पर्शेनैव तमुत्सवं संभाव्य तस्य सर्वोत्कृष्टतां सूचयंत्यस्तस्याः सौभाग्यमधि
कं वर्णयंति अपीति अद्रिसंभवोयमुत्सवः अपि किं त्रिविक्रमस्य लोकत्रयाक्रमार्थं प्रकटितैश्वर्यस्य श्रीविष्णोः
पादेन सर्वाक्रमणाद्बभूव अपितु नैव तदानीमीदृशोत्सवशोभाविशेषासंपत्तेः अहो न भवतु वा पादस्पर्श
मात्रात् त्वदुद्धारार्थं प्रकटितमहावराहमूर्तेर्भगवतः साक्षात्संभोगोपि नासिद्ध इत्याहुः आहो इति यद्वा अ
द्रिसंभवस्त्रिविक्रमपादस्पर्शात् कारणात् किंवा वराहमूर्तिपरिरंभणेन कारणेन बभूव तत्कथयेति शेषः
इति सर्वथा श्रीकृष्णस्पर्शनत्वसकाशान्माहात्म्यविशेषः सूचितः अतस्त्वद्विरहं कथं सहेमहीति किंवा त्वं पर
मसुभगा वयं च त्वद्रहिता दुर्भागा एवेति कृपया तत्पदवीं सम्प्रदर्शयेति भावः इयमपि श्रीतुलसीवनस्पतित्वाप्रि
यासापत्न्यात्तदिच्छानुसाराद्वा न कथयेदिति सख्येन विश्रंभेणैव पृच्छेति अपीति ॥ अप्येणपत्न्युपगतः
प्रिययेह गात्रैस्तन्वन्दृशां सखि सुनिर्वृतिमच्युतो वः ॥ कांतांगसंगकुचकुंकुमरंजितायाः कुंदस्रजः कुलपते
रिह वाति गंधः १२ हे एणपत्नीति त्वयापि प्रियस्पर्शविरहदुःखं ज्ञायत एव अतः कथ्यतामिति भावः एकत्वं विर

हार्त्तिभरेण दूरे दृष्ट्याप्रसरणहेतुकस्याः एव दृष्टेः/ दृशाविति वर्त्तते च वकुलत्वमच्युतोपगमेन गौरवात् यद्वा एकत्वं जात्यपेक्ष
या किंवा वकुलीपुत्रास्तु मध्ये अतिकवर्त्तिनी मे कांप्रत्येव प्राधान्येन प्रश्नात् प्रियया कया चिद्गोप्या सह प्रियये ति सहगमना
त् तेनेर्ष्यैव वा गात्रैर्दृशांसु निर्वृतिं परमसुखं तन्वन्निति अन्यथा विशालदृशसन्ननेत्राणामसाफल्यं किं वा अन्यथेदृशादृ
ष्टसंभव इति भावः सुशादः सर्वान्यसुरवादपि वैशिष्ट्यविवक्षया तेनास्यं तातिकसंदर्शनमप्यभिप्रेतं अन्यथा सुनिर्वृ
त्यसंपत्तिः हे सखीति तस्या अपि श्रीकृष्णविषयकसानुरागदृष्ट्या वने सहविहारादिना वा अतोस्मासु वंचना नैव कार्येति
भावः अच्युत इति सुनिर्वृतिविस्तारणे किं वा इहोपगमने विच्युतिर्नास्तीति भावः तदेवाभिव्यंजयन्ति कान्तेति तद्विजानाति
तद्विद इति न्यायेन तासां तत्संबंधपरिचयोस्तीति तथोक्तं मालां बिभ्रद्वैजयन्तीमिति पूर्वमुक्तं न तच्च सहत्वालिकुलैर्बिभ्र
दिति तुलसीमाला अधनात्वकुंदस्रज इत्येवं मालात्रयं गम्यते यद्वा वैजयंत्या मध्ये अत्रापि तुलसीसद्भावात् तद्धारणं ज्यो
तिस्नां रात्रौ कुंदमालायाः शोभाभराद्वैजयन्तीपरित्यागेनाधुनातस्याएव धारणं ज्ञेयं कुलपतेर्गोकुलेन्द्रस्य किं वा
गोपीकुलस्वामिनः तत्कृपयावेदयध्वमिवासाद्यानुक्तिः अतस्तदेकप्रियाणामस्माकं तदभावेन प्राणरक्षा न स्यादिति
सर्वथा शीघ्रं कथयेति भावः अन्येन कुत्सितं लाति आदत्ते इति यो जनस्तस्येव पतिरिति तया साहित्यं युक्तमेवेतीर्ष्या
योक्तिः अन्यत्रैव तीर्थ्यातं यद्वा प्रियया उपगतसंगतः सन्निहास्ते ननु तर्हि अन्विष्य दृश्यतां तत्राहुः गात्रैरिति परमधन्य

पुष्पस्तबकैर्भिरे वसदृष्टपत्ते नत्वस्माभिर्दृष्टं शाम्यते इत्यर्थः ननु तर्हि एताश्चवल्लीत्तैवनेत्याहुः कांतेति ।। अन्यत्समानं हरिणीनां
73 विलोकनाभिनिवेशेनानिज विरहार्तिदृष्ट्वा तासामप्याविर्भरोदयात् स्तत्धृतांमत्वा ता विहाय फलपुष्पादिभारेण नतान्
वृक्षान्वीक्ष्य विनयभरत्तनम्रान्परमसाधून्मत्वा सर्वाने वतान्पृच्छंति बाहुमिति ।। बाहुं प्रियांसउपधायगृहीतपद्मोए
मानुजस्तुलसिकालिकुलैर्म[redacted]दांधैः अन्वीयमान इह व स्तरवः प्रणामं किंवाभिनंदति चरन्प्रणयावलोकैः १२ बाहुं
प्रियांसउपधायेत्यादि किं पूर्वोक्तगंधप्राप्त्याप्रियया सह गमनं संभाव्य तत्र च ललनास्कंधसौरभ्य मिश्रितश्रितश्रीनदाकुसौर
भ्यं तथा श्रीहस्ताभोदाक्तपद्मगंधं तथा भ्रमरगंधसंवलितं तद्गततुलसीगंधं च प्राप्य प्रोक्तं किं वा नागराणामीदृशी परिपा
टी भवेदितियुक्तं तथोक्तं तुलसिकया अलिकुलैरिति तस्या एव सर्वतो मधुरामोदविशेषात् अत एव मदांधैस्तैरन्वी
यमानाद्युत्तनेन बाहुमित्यादिना वरसविशेषप्रकटनं तथा तुलस्याः सौभाग्यं तत्संबंधादलीनां च सूचितं अन्वीयमानत्वेने
व मदांधानां तेषां महाध्वनिना निजनिकुंजलीलाभंगशंकया पुष्पाद्विधव्यवधानेन तान्परिहर्तुं किंवा पुष्पस्तुष्पेषु सं
चारयितुं इह चरन् विशेषतश्च प्रणतवत्सलत्वादत्रैव चरन्स्तत्रीतिभावः प्रणयावलोकैः किमभिनंदति अनुमोदते स्वी
करोति वेति तेषां सुदुर्लभत्वात् किं वेति साकूतं प्रश्ने अनस्तत्कथयते तिशेषः अन्यत्तैर्व्याजितं अथवा स्वांसप्राप्ते
बाधिकनतान्वृक्षान्वीक्ष्य तेन श्रीदक्षिणहस्ते नपद्मग्रहणं संभाव्य क्वचित् भयादिवाग्रतोद्रुतपतितान्यधिकमग्ना ७३

स्याकुलानि प्रियापदानि वीक्ष्यते तेन च मदांधभ्रमरानुगमनं संभाव्य किंवा तत्तत्पदोपरि भ्रमरमुखविनिर्गलितमधुकण
स्सर्वतो वीक्ष्यत तथा तथोक्तमिति ज्ञेयं । यद्वा ॥ केवलमुन्मत्ततयैव तत्तदुक्तिः न च किंचिद्दर्शनविचारादिनेति इत्युन्मत्तवद्व
इति वक्ष्यमाणत्वात् श्लोके षेण मदांधा एव तमनुसरंतीति तथा ते षां संबंधात्सोपि मदांध एवेति षेण परोक्षोक्तिः यद्वा मदं
धेरपि अतो गतमानाभिरस्माभिर्यदयमनुगम्यते तद्युक्तमेवेति भावः एते हि तत्रक्ताः तन्मतमनुसरंतो नूनं न कथयेयु
रीमतर्हि स्त्रीत्वेनात्मीया लता एवेताः पृच्छाम इत्यन्योन्यमाकु पृच्छंतेति ॥ पृच्छते मालती बाहूनप्यालिंग्य वनस्पतेः नू
नं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥ १३ बाहुनाश्लिष्य इत्यादिकं सर्वं निजभावानुसारेण ॥ इत्युन्मत्तवयो गोप्यः
कृष्णान्वेषणकातराः लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः १४ ● इति उक्तप्रकारेण । यद्वा ॥ इति ईदृशं
॥ उन्मत्तानां वच इव वचो यासां गोपीनां ता उन्मत्तवच इत्युक्तानुवादः तत्र द्वा वचनानि केवलमुन्मत्ततयैवेति पूर्वोक्तौ
न्मत्तकवदित्यस्य दार्ष्टार्थं तत्र चेन्मत्तवचस्त्वं अयोग्येष्वपि प्रश्नात् तत्रापि तथा तथा तत्तत्प्रश्नादिति अनुच
क्रुरित्यत्र हेतुः कृष्णस्य परमाकर्षकस्य अन्वेषणाय कातरा इति अतः कातर्येणैव तत्तदनुकरणेन च स्वाच्छंद्ये
नेत्यर्थः तत्रैव हेतुः तदात्मिकाः तेन हृतचित्ताः यद्वा न च्छन्देन लीलाः परान्स्वरूपं तेन तत्तस्यानुकरणे अभिनिवेशेन

तत्तत्सम्पत्तिकमभिप्रेतं यद्वा॰ ननु तल्लीलास्मरणेनापि विरहार्त्तीनां प्राणा दुर्द्धराः अनुकरणाद्यत्तेन च विवृद्धवह्निज्वा
लानां तासां हृदि कथमात्मादिविहृतिस्थ प्रभमाह तस्मिन्नेवात्मायासांताः सुशीतलाः तासां स्वं बंधेन न निःसृताः अ
न्यथा स्वच्छानवः सन्दग्धो भविष्यदेवेत्यर्थः यद्वा श्रीकृष्णाविष्टचित्ता इति तत्तदनुकरणं तद्वशात येवन खात्मवु
द्ध्येत्यर्थः अनुकरणमेव प्रपंचयति।। कस्याश्चिदिति नवभिः कस्याश्चित्पूतनायंत्याः कृष्णायंत्यापि वत्सायंत्या काचित्ता
नुदंत्यन्या पदाहरच्छकटायंती ७५ तादृविवेकस्तेभ्यंजि त एव तत्र चानुचक्रुरित्युक्तेरनुकरणस्यैव प्रपंचने कार्येपि तन्म
यत्वप्रपंचनमनुकरणस्यैव सम्पत्तिबोधनार्थमिति अथवा केवलमनुकरणस्यैव प्रपंचोस्त्येयः तत्र चासौ देहिके चे
ष्टायाः प्रायो देहचेष्टयैवानुकरणं वाक्चेष्टासंवलितायाः प्रायस्तथैव मानसचेष्टासंवलितायाश्च तथैवेत्येवं त्रि
धानुकरणं तत्र यद्यपि भावनयैव सर्वत्रानुकरणं तथापि तत्र तत्र तत्प्राधान्याविवक्षया त्रैविध्यं तत्रादौ देहचेष्टाप्रधा
नानुकरणमाह त्रिभिः पूतनायमानया पूतनाद्यनुकरणं केवलं भावनयैव किंचित्तत्तन्मुद्राद्याचरणेन ननु बे
दिना सर्वथा तदसंभवात् अत एव वक्ष्यते॰ कृष्णाभिभावनामिति तदपि विरहे वस्वपेनयद्यपि न स्युश्चेत् तथापि वि
रहार्त्तिभरस्वभावेन तत्तल्लीलाभिनिवेशान् स्वयमेव संपद्येतेति पूर्वमध्यायारंभे उक्तमेव तत्र यद्यपि कृष्णप्रिया

णं तासां दैत्यानुकरणं न युज्यते तथापि केनापि सुदुरूहेन भाववैचित्रीविशेषेण विष्टास्ताः कृष्णस्यैव लीला अनुचक्रुः
तासां प्रियसख्यस्तत्तत्तद्भावविष्टास्ता वितर्क्य न त्वेवं तत्त्वेन तासं जनेन महादुःखापनोदनार्थं बुद्धिपूर्वकमेव पूतनाद्यनुक
रणं कृतवत्य इति अथवा इति एवं ताः कृष्णान्वेषणे कातरा बभूवुः अनु अनंतरं तासां प्राणरक्षार्थं तास्ता लीलाः कर्त्र्यः विरह
विक्लवाः सखी एव व्रजसुंदरीस्तदात्मिकाः लीलामयीश्चक्रुः अतस्तत्तल्लीलापरिकरत्वाद्दैत्याद्यनुकरणं नायुक्तमिति सर्वम
नवद्यं स्तनमपि वदिति चानुकरणमात्रं न तु तत्त्वतः अनुकरणस्यैवापेक्ष्यत्वात् एवमग्रेऽप्यदूह्यं शकटायती शकटायमा
ना एवमग्रेपि शकटानुकरणं तोकायमानायाः परिशकटवत् कथंचिदवस्थानं तेषु यं। दैत्यायित्वाजहारान्यामेका कृष्णा
र्भभावनां रिंगयामास काप्यंघ्री कर्षती घोषनिःस्वनैः १६ घोषाः किंकिण्यस्तेषां निःस्वनैः कृत्वा सहिता वितिष्ठा
। तच्च साक्षाद्देवता सामपि यादेवनूपुरसद्भावात् एतच्च घोषप्रघोषतां चिरमित्याद्युक्तरिंगणलीलानुकरणं गोपा
यं त्यद्इति। कृष्णरामायिते द्वेतु गोपायंत्यश्च काश्चन वत्सायितीं घ्नंति चान्या तत्रैकानुवकायिनीं ॥१७॥ गोपवालायां
त्यः इति शेषः तस्याः बालकैरेव वत्सत्वारणात् चकारात् अघायमानां च हंति अहन् सामीप्ये वर्त्तमानाः अधुना
वा कत्र्यधानानुकरणं पंचभिर्वदन्नाद्दौ प्रलंबवधात् प्राक्तन ग्रीष्मकृत विचित्र लीलानुकरणमाह आहूयेति
द्वाभ्यां ॥ आहूय दूरगा यद्वत्कृष्णस्तमनुकुर्वती बेणुं क्वणंतीः क्रीडंती मन्याः शंसंति साध्विति ।।१८।। अत्र वो कृष्ण

धानुनुकरणत्‌ किंवानुकरणे क्रमशोऽसंतावेशेन तत्मकत्वात्‌ कृष्णायंतीत्यादिकं पूर्ववन्नोक्तं दूरगा इति तैर्व्याख्या
तमेव यद्वा दूरवर्त्तिनीर्व्रजादिशिष्टा व्रजदेवीः वेणुनादसंकेतेन यथा कृष्ण आकूयति तथाकूयेति एवमनुकुर्वती कांचि
75 तत्क्रीडंतीचगावादिक्रीडांकुर्वंती अन्यागोपभावनापन्ना इति तेयं कस्यांचित्स्वभुजं तु न्यस्यचलंत्याह हापरान नु कृष्णोहं पश्य
तगतिंललितां [illegible]मितितन्मना ॥१९॥ कृष्णः सर्वगुणरूपादिसंपूर्णोहं अतो गतिं ममाश्रयभूतां ललिताख्यां गोप्यः पश्यत
इति एतत्‌ तदुक्तं स्मरणेति शेषः तत्र तेन कदाचित्‌ केनापि भावेन पूर्वमुक्तमस्तीति बोद्धव्यं ननु कुतो हे वा कंसनस
मापितं तत्राह तन्मनाः कृष्णहृतचित्तेति यद्वा ननु हे गोप्यागोप्यो वा पश्यत गतिं मम चेष्टां गमनं वा ललितं मनोहरं तन्म
नाः श्रीकृष्णाविष्टचित्तेत्यर्थः अनेनानुकरणस्य सम्यक्ता पूर्ववदेवाभिप्रेता माभैष्ट वातवर्षाभ्यां तत्त्राणं विहितं म
याइत्युक्ते केन हस्तेन यतंत्युन्निदधेऽम्बरं ॥२०॥ अनुकरणवशात्‌ आवेशेनैव किंवा तत्तल्लीलावश्येन साक्षाद्वाता
दिस्फूर्त्तेरिति एवमग्ये दावाग्निं पश्यत्स्वपि यतंतीति बलहानिः सूचिता उद्यच्छंतीति वा उन्निदधे श्रीगोवर्द्धन
वदूर्ध्वे नितरां धृतवती ॥ आरुह्यैकापदाक्रम्य शिरस्याहापरान्नृप दुष्टाहे गच्छ जातोहं खलानां ननु दंडधृक्‌ ॥२१॥
॥ ननु निश्चये संबोधने वा नृपेति पाठे आश्चर्ये तासंबोधनं दुष्टाहे रे कालिय गच्छ इतो निःसर अन्यथा दंडं करिष्ये
इत्याह जातइति ननु निश्चितं न नचेति चकारान्वयः कालियदमनलीलानुकरणे त्वित्यर्थः ॥ तत्रैकोवाच हे गोपा ७५

वाग्निं पश्यतोल्वणं चक्षुर्भ्यां स्वपि दध्वं वो विधास्येद्दोमम ंजसा ॥२१॥ एवं तत्र कृतं बद्धं सी तासां क्रोसु मुंजाटव्यामपि कृत्तं ददा

वतोरसुलोंद्दृ विधृमे वानुकृतिमितिज्ञेयं यद्वा॰ तत्रतासु मध्ये च॰ तत्र मौंजाटविकतदनुकरणमेव पाठांतरस्यापि मेव

अंबुज साश्रुनायासेनैव अधुना मानसचेष्टाप्रधानानुकरणमाह ॥ बद्धान्यया स्रजा काचित्तन्वी तत्र उलूखले भीतासुदृक्पि

धायास्यं भेजे भीति विडंबनं २२॥ अन्यया तत्संभोगिन्या पश्चादागतया दूती रूपया कयाचित्कृद्धया तन्मतानुसारिण्या यद्वा

अन्यया स्रजा जगद्विलक्षणया परममृदुलयेत्यर्थः पूर्वमात्रापि परमकोमलगोपालादि रज्जुभिरेव बद्धत्वात् यद्वा

पूर्वस्रजैकया पश्चादन्यया स्रजा बद्धा पूर्ववद्रुद्धा बंधनार्थं तासां स्रजोपि बंधनसामर्थ्यं तन्मतानुसारित्वं च सं

भवेदेव तन्वी विरहात्कार्श्यं स एव कार्श्यं प्राप्ता लीलाप्रदुर्भावपक्षे सर्वं समंजसमेव तत्रानुकरणे तास्विति वा उलूखलइ

ति उलूखलानुकारिण्यां कस्यांचिदित्यर्थः सुदृगिति॰ दृग्भ्यामपि चकितविलोकनादिना भयमनुचकारेत्यर्थः मुखं

पिधाय हस्ताभ्यां एतच्च बालुकस्वाभाविकनयनलक्षणं भीति विडंबनं कंपपुलकादि किंचिद्रोदनकाकुवाक्यादि च

एवं प्रायो भयादिना मानसचेष्टानुकरणमेव द्योतितं भयस्य मनोधर्मत्वात् एवमत्यंतभक्तवश्यता मयी श्रीदामोद

रलीला सर्वासां लीलानां मध्ये श्रेष्ठतमेति तदनुकरणं मधुरेण समापयेदिति ॥ सायेनस्य वीते प्रोक्तं धेनुकप्रलंबयो

76 वैध· श्रीबलदेवकृतत्वान्नानुकृतः कुमारीवस्त्राहरणं यज्ञपत्नीगणाकर्षणं च लज्जया किंवा तत्तल्लीलारसस्यात्मन्येव
पर्यवसानात्तत्पदनपेक्षया यमलार्जुनभंजनं श्रीदामोदरलीलांतर्गतत्वान्पृथग्नानुकृतमिति पूर्वोक्तलीलाक्रमाति
क्रमस्तु तासां विरहविह्वलतावर्णने न श्रीबादरायणेरपि तादृशाभावापत्त्या तदनुसंधानापगमात् किंवा लिखितस्यापि
न चेष्टादीनां तिसृणामुत्तरोत्तरस्मिन्नेकैकस्य समवेततया केवलं च संवलितत्वयोस्तत्रापि न्यूनाधिकत्वयोः क्रमापेक्ष
योक्तेः यद्वा विरहकातरतया तन्मनस्तया वा पौर्वापर्यानुसंधानाभावादिति एवमिति एवं कृष्णं पृच्छमाना वृंदावनलतास्त
रून् व्यचक्षंत वनोद्देशे पदानि परमात्मनः २४॥ पूर्वोक्तप्रश्नप्रकारेण॥ यद्वा तत्तल्लीलानां पूर्वोक्तप्रकारकपुनः पुन
रनुकरणेन तत्र हेतुः कृष्णं चित्ताकर्षकमिति पदानि व्यचक्षत पुनर्भूमौ दृष्टिनिपातात् द्विशेषेण चक्षते तानि केशवां
घ्रिस्पर्शोत्सवेत्याद्युक्तौ पूर्वं केवलं संभावनयैव अधुनानु साक्षादेवापश्यन्नित्यर्थः साक्षाद्दृष्टान्यपि विरहवि
ह्वलतयानुसंधानाभावाददृष्टानीवाभवन् अधुना च लीलाविष्टत्वेनानुकरणात् किंचिदुपरागात्यावुद्बुद्ध्ये
नानुसंधानपूर्वकमपश्यन्नित्यर्थः अत एव विशब्दः परमात्मनः परमप्रियतमस्येति रात्रावपि तल्लक्ष्मदाणे
स्तद्दर्शने हेतुः अन्यत्रैर्व्याख्यानं यद्वा· प्रदोषे गते शारदपूर्वचंद्रस्य चंद्रिकासु विस्तृतासु दूरादपि स्पष्टतया तद्द
र्शनमभूत् यद्वा एवमित्यादिकमनुवादमात्रं प्रश्नमध्य एव तद्दर्शनविवक्षया तत्राप्यग्रे न्यमाहुः ॥ पदानिव्य ७६

क्रमेत्तानि नंदसूनोर्महात्मनः लक्ष्यंते हि ध्वजांभोजवज्रांकुशयवादिभिः २५ पदानि चिह्नानि व्यक्तं निश्चितं एतानि नंदसू
नोरेव भवंति नान्यस्य· हि यतः ध्वजादिभिर्विशिष्टानि विलक्ष्यंते तत्रैव हेतुमाहुः महात्मनः महापुरुषत्वादित्यर्थः आदि
शब्दाच्चक्रशंखवाद्यः अत्र विशेषः श्रीविष्णुपुराणे॥ विलोक्यैकाभुवं प्राह गोपी गोपवरांगना पुलकांचितसर्वांगी वि
कासिनयनोत्पला ध्वजवज्रांकुशाब्जांकरेखावंत्यालि पश्यत पदान्येतानि कृष्णस्य लीलालंकृतगामिनः इति ध्वजा
दीनां धारणप्रयोजनमुक्तं॥ स्कंदे दक्षिणस्य पदांगुष्ठे मूले चक्रं बिभर्त्यजः तत्र जन्मजनस्यारिषड्वर्गच्छेदनाय
सः मध्यमांगुलिमूले तु धत्ते कमलमच्युतः ध्यातृचित्तद्विरेफाणां लोभनायातिशोभनं पद्मस्याधो ध्वजं धत्ते स
र्वानर्थजयध्वजं कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदकं पार्ष्णिमध्येंऽकुशं भक्तचित्तेभवशकारिणं भोगसंपन्मयं ध
त्ते यवमंगुष्ठपर्वणि तथा वामपदांगुष्ठमूलतस्तत्सुरवंदरं सर्वविद्याप्रकाशाय दधाति भगवानसौ पद्मादीन्य
पि चिह्नानि तत्र दक्षिणपादवदिति॥ तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः स
मब्रुवन् २६ तैस्तैर्ध्वजादिलक्षितैः वीप्सा बाहुल्यस्य केवलस्य वाचिवेत्सया अबलाविरहान्वेषणभावबलहीना त्र
पितस्य कृष्णस्य पदवी वर्त्म अग्रतोऽन्विच्छंत्यः अग्रगयमाणाः वध्वाः कस्याश्चिद्व्रजदेव्याः यद्वा स्वभावत एव लज्जाशी

लत्वात् स्नुषावत्सर्वतः संकुचितत्वेन । किंवा श्रीव्रजेश्वर्य्या मनोरथविशेषेणवधूरितित्मुखेनोक्तया गोकुलेवधूत्वेनप्रसिद्धा
याः श्रीराधाएवतन्नामाग्रहणकारणेनोल्लिखितमेव वधूपदलक्षणमुक्तं श्रीविष्णुपुराणे कापितेन समं याता कृतपुण्या
77 मदालसा पदानितस्याश्चैतानिघनान्यल्पतनूनि च सुष्ठुपक्तानिमिलितानिपदानिकिंत्वसन्यस्तप्रकोष्ठत्वात् एवमा
त्मारामत्वादिनातासांमानतोऽसूययावांतर्हितइतिनिरस्तं तासामेकस्थानयनात् तच्चतत्रैवताभिः सहस्थितयातया
केनापिसंकेतेनततोनिःसारितयातदर्थंदूरेदूरेप्रादुर्भूतस्याग्रेकियत्पदप्रयाणेनानंतरंमिलनादित्युक्तं आर्त्तीः स्वपरि
त्यागेनतदेकपरिग्रहात् यद्वाविरहेणार्त्ताअपिसम्यग्विचारादिपूर्वकमब्रुवन् अन्योन्यमूचुः किंतदाह ॥ कस्याः प
दानिचैतानियातायानंदसूनुना अंसन्यस्तप्रकोष्ठायाः करेणोः करिणायथा ॥२७॥ कस्याइत्यादिनाब्रुवमित्यंतेन
नंदसूनुनासहयातायाएतानिकस्याःपदानिपरिचीयंतामितिशेषः श्रीभगवतास्कंधे तत्प्रकोष्ठस्यन्यसनंचरस
विशेषेण किंवाराधौस्खलंत्यास्तस्याःसुखगमनार्थंबलाद्दूरेनयनार्थंवा अनेनतस्यामधिकप्रीतिःसूचिता तामे
वदृष्टांतेनाहुः करेणोःरिति तयोरपिकाममदेनप्रीत्यातथैवेगमनात् पश्चाच्चश्रीराधादेव्यास्तानिपदानिपरिचि २१
त्याश्रुस्तास्तन्नाम निरुक्तिद्वारा तस्याभाग्यंसहर्षमाहुः ॥ अनयाराधितोनूनंभगवान्हरिरीश्वरः यन्नोविहायगोविं

द: प्रीतोयामनयद्रहः २८ नूनं विनर्कोनिश्चयेवाहरिः सर्वदुःखहर्त्ताभगवानस्त्रीनारायणः ईश्वरः भक्तेष्टदानसमर्थः
सवतेत्रोपिवा अनयैवराधितः आराध्यवशीकृतः नच अस्माभिः अन्यथाऽस्माकमेतद्विरहार्त्तोद्यसंभवः राधयति
आराधयतीतिश्रीराधेतिनामकारणंचदर्शितं यत्त्वयस्मात्कोविंदः गोकुलेंद्रत्वेनतस्याअस्माकंचतुल्योप्यसौ
नोऽस्मान्विशेषेणहित्वादूरतोनिविडवनांतस्त्यक्त्वा तत्रापिरहः अस्मदगम्ये एकांतस्थानेयामनयत् यद्वागो
विंदएवासानयाराधितः तस्याः परमभाग्यबोधनार्थंगोविंदमेवविशिनष्टीति भगवान्निजाशेषमाधुर्य
मैश्वर्यप्रकटनपरः अतोहरिः सर्वार्त्तिहर्त्ता किंवारूपगुणादिनासर्वमनोहरः ईश्वरः व्रजजनप्राणनाथः
अनस्तदनुभवस्तयैवक्रतिइतिभावः अन्यत्समानं यच्छब्दद्वयंहेतोस्तस्यैववदार्ढ्यार्थं किंवा यत्प्रीतः तस्मा
द्यामनयदितिवाक्यद्वयकल्पनयायोज्यं एवमग्रेप्यूह्यं यद्वाऽयन्नरहोगच्छन् धन्याअहोअमीआल्योगोविंद
स्याङ्घ्रेरेणवः यान्ब्रह्मेशौरमादेवीदधुर्मूर्द्ध्न्यघनुत्तये ॥२९॥ अमीइमे आल्यइतिसंबोधनं तत्रसर्वासामेकम
त्यार्थंभक्तिविशेषजननार्थंवाधारणेसर्वेषांप्राधान्यविवक्षयाचशब्दाप्रयोगेपितेषांयथोत्तरंश्रैष्ठ्यसूचनं
कृष्णस्यपश्चात्पादाङ्घ्रेरेणून्गृह्णंतोब्रह्मेशादयः सदैवताभिर्दृश्यंते अतोदृष्टमेववर्ण्यते नत्वैश्वर्यादिप्रा

78

येणदेवीतिश्रीवृषभानुगोपनंदिनीव्याख्यास्यं यद्वा तद्वेणधारणेन लक्ष्मां भक्तसुदयेनोक्तं देवीपूज्येति मूर्द्धेति
भक्तिभरंद्योतयंति अयं अपराधो विरहादिदुःखं वा अतस्तेन ध्याए वअस्माकं च भक्त्यातद्धारणादघं मुक्तमेवे
तिभावः अन्यत्तैर्व्याख्यातं यद्वा रेणवएव धन्या उत्तमाः श्रीकृष्णरूपपरमधनदानयोग्या वा यद्वा अमी गोखुरंग
णपतिताः पूर्वं दृष्टा वा अस्याः पदैः संपृक्तास्त एव धन्याः एषामात्मर्योक्तिः यद्वा इमे रेणवः आत्मसंबंधेमाधन्याः गो
विंदनीतत्वात्कौर रेणवकृत्वे एवं दृष्टांतत्वे नरेणूनामपि वतस्या अपि धन्यत्वमभिप्रेतं श्रीचंद्रावल्याः सखीना
मुक्तिस्तस्याइति तस्मा अमूनिनः क्षोभं कुर्वंत्युच्चैः पदानि यन् येकापहृत्य गोपीनां रहो भुंक्तेऽच्युतधरं २.३ उच्चैः
अधिकं क्षोभं वैकल्यं पूर्वोक्ते धैर्यहानिं वा यद्वा उच्चैर्गेवउच्चभरागैः असमन्मूर्द्धे पर्यर्पितानि वेत्यर्थः अपहृ
त्येति एकाकिन्येव रहसि भोगात् यद्वा चौर्येण तयानीतत्वादेवसोऽस्माद्विहायात्रागतः अन्यथा कथमा
गच्छदिति भावः गोपीनां समान्यतः सर्वासामेव धनामिति पाठः तेषां संमतः सर्वस्वमिति व्याख्यानान्तः अ
न्यथा गोपीनां भोग्यमित्येव व्याख्यातं स्यात् अच्युतस्यतं सक्तान्यत्र कुत्रापि गच्छतो धरमिति यद्वा तस्मादच्युता
अविच्छिन्ना सतीति चिरं भोगो भिप्रेतः श्लेषेणच्युतोऽस्मन्मुखात् कलितो यो धरस्तमिति निजोच्छिष्टभोगस्त
स्यासूचितः नलक्ष्यंते यदास्यवत्तस्यानूनंतत्कणंकुरैः स्विद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः २९ उन्निन्ये स्कं ७८

धमारे पिचवानि तिस्कंधश्चाकुसुलता मे तिवद्धमालाननुसारे एतेर्ष्याख्यातं प्रेयसीप्रियतमां प्रियदूतिपैशुन्योक्तिः
अन्यपदेच अन्योन्यंप्रियत्वेन तत्रापि प्रेयसीत्वेन सर्वाभ्यस्तस्यां प्रीतिरधिकास्सूचिता अतउन्नयनं युक्तमेवेति
भावः यद्वा उन्नेमेइतिहस्ताभ्यामुच्छ्राप्यांकेकृत्वायति न्वेइतिज्ञेयं तथास्यापेक्षतादृशाक्लिंगनादिरससं
पत्त्या प्रेयसीत्वं सुसिद्धमिति तल्लक्षणमाहुः इमानीति हेगोप्यइति विदाधाभिर्युष्माभिरेतल्लक्ष्यतइतिभा
वः कामिनइति अन्यथातदसंभवः ईर्ष्योक्तिरेषा वस्तुतस्तुकामयुक्तत्वेनैवाधिकास्तोषाणांतदपेक्षासूचिता अन्यपदेच
तस्यामासक्तिरभिप्रेता एततपर्यंवकुपुस्तकेषुनदृश्यते पश्चादप्येतस्याः पदानिदृश्यन्ताकुः अत्रैतेसत्सूनावचयः
प्रियार्थप्रेयसाकृतः प्रपदाक्रमणे एतेपदरूपताश्चाकृतेपदे २२ महात्मनाविदग्धप्रियो मणेनेत्यर्थः श्लेषेणमहान्
पूर्ववत्स्थूलआत्माबुद्धिर्यस्येतीर्ष्योक्तिः इदंपद्यंक्वचिदेवदृश्यते प्रियार्थप्रेयसेत्यत्रेन पूर्वोक्तस्यप्रेयसीप्रिय
इत्यस्यवैपरीत्ये नाभ्यान्योन्यंतुल्यएवप्रेमासूचितः यद्वा उन्नयनापेक्षया पूर्वंप्रेयसीमित्युक्तं इदानीं च प्रेयसे
तिप्रियतमत्वेनतयाकृतेनादेशेनपुष्पावचयः कृतइत्याद्यभिप्रेतं तत्रपदेइति द्वित्वंश्रीवृंदावनवर्तिपुष्पवृक्षाणामे
कमस्येकदेशेस्थितमपि बहुलपुष्पावचयसिद्धेः किंवास्थानेस्थानेवहूनामप्युदितानांपदानामेकत्रदृष्टोद्देयो

ईष्टे: अतएवश्रीविष्णुपुराणे पुष्पावचयमत्तोच्चैस्तन्ने दामोदरे ध्रुवं येनाग्राक्रांतिमात्राणि पादान्यत्र महात्मन इति
॥केशप्रसाधनं तत्र कामिन्याः कामिना कृतं तानि चूडयता कांतामुपविश्य मिह ध्रुवं ३३ केशानां प्रसाधनं संस्करणं
79 तच्च स्वांगुलिभिः तदर्थात्मशिरोन्यस्तकंकतिकया वा तुशब्दो भिन्नोपक्रमे हीति पाठे निश्चितं प्रसाधनप्रयोजनं
सूचयंति कामिन्याः कामिनेति कामक्रीडासुखार्थमित्यर्थः किं वा पूर्वोक्तकामिन इतिवत् ध्रुवं निश्चितमि
ति साक्षात्तल्लक्षणमिव्यक्तेः॥ रेमे तया चात्मरत आत्मारामोप्यखंडितः कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्म
तां ३४ स्वस्मिन् आत्मनि आत्मना स्वयमेव यद्वा आत्मना स्वभावेनैव रतस्तत्र च तेति पाठे रेमे चेत्युक्तसमुच्च
ये चकारः ततश्चात्मनैव रतस्तत्र च स्तादृशोपि रेमे इति तां दृशाचमध्य नानास्थितामिति पूर्ववदर्थः पुनः पुनस्त
योक्तिस्तदार्ढ्याय अतस्तयैव तुष्टः तयैवारमतितद्विभ्रमैर्वशीकृतश्चेति तात्पर्यं अतः प्रेमानिर्जितत्वेन तस्याः स्वसर्व
स्वमर्पितमिति सूचितं तच्च भक्तवत्सलवरस्य प्रियजनप्रेमपरवशस्य तत्स्यन्न दोषः कश्चित् प्रत्युत निजभग
वत्तासारप्रकटनरूपमहागुण एवेति पूर्वं बहुशो लिखितं श्रीभागवतामृते च विवृतमेव यद्वा स्वात्मनः सखी
नात्मतुल्याः किंवा स्वस्यात्मनः प्रियाः व्रजसुन्दर्यस्तासु रतोपि अखंडितः संपूर्णः सत्कायमनोवचना सन्नासा ७६

कल्पेनरेमेइत्यर्थः अत्यन्तसमानं नचैवंकेवलं निजप्रियाएवानेदिताः अन्येषामपिहितंकृतमित्याह कामिनीमिति कामु
वश्यैः स्त्रीवश्यैश्चजनभावम् इतिलोकान् शिक्षयामासेत्यर्थः तत्रयथाश्रीभगवान्निजाचरितेनपुंसः शिक्षयतितथास्वप्रि
याचरितेनचशिक्षयन् तद्द्वारतासां दुरात्मतांदर्शयामासेत्यर्थः तदेवाह साचेति यद्यपितादृशो व्यवहारोमानस्य
नदुरात्मतया किंतुकेवलमुभयोर्महानागरयोरन्योन्यंप्रेमविवर्द्धनो विशेषात् स्वस्वाधीनभर्तृकत्वेनोचितएव
तथापिदर्पस्तत्कृतोऽक्लि विशेषश्चाम्बरेऽम्बरेऽनुचितएवेतिः [illegible]धौपासनाप्राप्त्यपरैस्तथाव्याख्यायते तद्दोषोपि
परिहृतएव तयोर्लोकशिक्षापरत्वात् यद्वाकामिनामिंद्रादीनांदैन्यं ईदृशाश्रेयसीकृततादृग्विलासादिसुख
भावात् स्त्रीणांदुरात्मतां दुष्टविषयकामतांदुर्बुद्धितांवा श्रीकृष्णेतरकुत्सितपतिभजनात् अथवाकामिनः
प्रतिदैन्यं स्त्रियश्चप्रतिदुरात्मतामेवदर्शयन् शिक्षयन्नित्यर्थः अयंभावः यदिकामक्रीडायां रसिकतास्तितदा
पिरंसुभिः पुंभिरीदृश्यास्त्रीवश्यतयादीनैरेवभाव्यं स्त्रीभिश्चकंदर्पक्रीडादिषुलज्जादिकंपरिहृत्यपुरुषंचवशीकृत्य
स्वातंत्र्यरूपदुष्टस्वभावापराभिर्भाव्यमिति एतच्चतयोर्द्वयोःसमाएवचनव्यवहारादेः किंवाउक्तव्यवहारस्याभिप्रायेण यद्वा
अत्रोत्करमणप्रकार एवायंदर्शितः ततश्चवैदग्धीविशेषेणकामप्रशास्त्रोक्तविविधबंधादौस्कंधद्वयोपरिस्त्री

पादद्वयधारणाद्विनादैन्यं दौरात्म्यंचाधरंदशनान्नखक्षतकेशग्रहणपुरुषायितादिनो दुःखं दैन्यदुरात्मताशब्दप्रयोगश्च
80 स्नानादिनिषेधमुनिविशेषापेक्षया वस्तुतस्तु निजरसविशेषेणउक्तिभंग्यैवेति यद्वा आत्मरत इति सप्तम्यंतं तेनस
हानयोरन्वयः ततश्च भावेक्तः आत्मरतौ दैन्यं दुःखमेवेति कामिनः प्रतिदर्शयन् तया कामभोगसिद्धेः आत्म
रतौ दौरात्म्यमेवेति स्त्रियश्च प्रतिदर्शयन् तयास्वापातिसेवाद्यसिद्धेः अत एवात्मारामान्तानादरेण तथासह
स्वयं रेमइत्येवमादिकं अलमिति विस्तरेण एवं तद्वचनं श्रीव्रजदेवीनामपि संगच्छेत श्रीभगवत्तत्त्वज्ञानेपि निज
भावाव्यभिचारेण रसविशेषमयत्वात् साचमेनेतदात्मानं वरिष्ठं सर्वयोषितां हित्वा गोपीः कामयाना माम् असौ भज
ते प्रियः इ तद्यामेन इति पूर्वं तासु मध्ये वर्त्तमाना यच्च अपितस्यास्तादृशो मानो नासीदिदानीमेवजात इति केचि
द्व्याचक्षते वस्तुतस्तु तदा तादृशरतौ सत्साभिस्पर्धः यद्वा नेतयातेनरमितं आत्मानं सर्वासां योषितां व्रजसुं
दरीणां मानेहेतुः गोपीः सर्वा एव त्यक्त्वापि कामयाना कामयमाना हित्वा असौ अनिर्वचनीयविचित्रमाहात्म्य
ः परमस्वतंत्रोऽस्ति दुर्ल्लभ इत्यर्थः तत्रापि प्रियः मदेकप्रेमकर्त्तासन् यद्वा सर्वासामेव प्रियोपि मामेव भजते
प्रेम्णानुवर्त्तते अयं च स्वाधीनभर्तृका या विदग्धवर्यो या मानस्तद्रसपरिपोषकोयुक्तएवेति तदनुरूपत ८

त्प्रसादश्चाग्रे भविष्यत्येव ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् नपारयेहं चलितुं नय मां यत्र ते मनः ३७ ततः मानानंतरं तस्मा
द्गमनात् रतिस्थानाद्वा दृप्ता गर्विता सती वनोद्देशं वनप्रदेशं तेनैव सहगमनक्रमेणाग्रतो गत्वा यद्वा मदनुगोयमवष्टंभ
वितेति दृप्तत्वात् स्वयमेव गत्वा तं केशवं परमेश्वरमपि किं वा केशिमथनाद्दूरं जहिताचरणपरमिति यद्वा केशवे शिष्टेनय
रमसुंदरं इति तदीयसौंदर्यमोहितेतिभावः अत एवाब्रवीत् किं तदाह नपारये रत्यापरिश्रांतत्वादितिभावः लज्जयासाक्षा
त्तथानुक्तिः किंवा सौभाग्यगर्वादेवतथोक्तिः ननु मुग्धे ताभ्यो दूरमग्रे स्थानांतरं द्रष्टुं गंतव्यमिति चेत्तत्राह नयेति पूर्व
वद्कांधे निधाय त्वमेव नयेत्यर्थः एवमुक्तः प्रियामाह स्कंधमारुह्यतामिति ततश्चांतर्दधे कृष्णः सावधूरन्वतप्यत ३८
स्कंधं मदंसं आरुह्यतामित्याह इदं च नर्मणैव प्रियामित्युक्तेः यद्वा कायः मदीयं वक्षः कटीरं वा तथा च विश्वः स्कं
धः प्रकांडे काये च बाहुमूलसमूहयोरिति ॥ ततः पश्चात् किं वा तस्मात्स्थानात् तस्याः सकाशाद्वांतर्धिं चकार ः भिन्नो
पक्रमे अंतर्दधे चेति समुच्चये वा अंतर्धानप्रयोजनं पूर्वमेवोक्तं तदेव सूचयति कृष्णः परमानंदघनमूर्त्तिरिति
आनंदविशेषार्थमेवेत्यर्थः अत एवोक्तं प्रियमिति अत्र च कश्चिद्विशेषः ॥ श्रीविष्णुपुराणे ॥ पुष्पबंधनसमान
कृतमानामपास्य तां नंदगोपसुतो यातो मार्गेणानेन पश्यत अनुयातेऽसमर्थान्या नितंबभरमंथरा या गंतव्ये द्रु
तं याति निम्नपादाग्रसंस्थितिः हस्तन्यस्ताग्रहस्तेयं तेनयाति तथा सखि अनायत्तपदन्यासालक्ष्यते पदपद्धतिः हस्तसंस्प

श्रीमात्रेण धूर्त्तेनेषाविमानिता नैरास्यान्मंदगामिन्यानिवृत्तेलक्षतेपदं नूनमुक्तात्त्वरामीति पुनरेष्यामितिंगितिकं तेनक्रूसेनतये
81 नैषात्वरितापदपद्धतिरिति साऽदृष्टातद्दर्शनेकजीवनावा अन्यतत्पतमुत्कुर्विल्लाप हानाथरमणप्रेष्ठक्वासिक्वासिमहा
भुज दास्यास्तेकृपणायामेसखेदर्शयसन्निधिं हारवेदेआर्त्तिसंबोधनेवा ततश्चसर्वत्रैवयोज्यं नाथप्राणेश्वररमणेर
तिदायक प्रेष्ठप्रियतम महाभुजगाढालिंगनदानारित्यर्थः एषांयथोत्तरंहेतुहेतुमतोभावः यद्वानाथप्रभो नकेवलं
तथाकिंतुरमणसुखप्रद विविधक्रीडाकारेतिवा अतःस्वभावतएववाप्रेष्ठ आत्मनः सकाशात्परमप्रियेत्यर्थः यत्तोम
हाभुजपरममनोहरसच्चिदानंदघनमूर्त्तेत्यर्थः।यद्वा।।परमभोगकर्त्तः इतिसततरत्यादिसुखसंपत्तिर्बोधिता यद्वा
व्रजेश्वरत्वेननाथेति तत्रापिपतिप्रयोजनसिध्यारमणेति तत्राप्युपपतित्वेनप्रेष्ठेति तत्रापिपरमसुंदरत्वादिना
महाभुजेति।।यद्वा।।क्वासिक्वासीतिपरमार्त्त्याविलपंतीसुविह्वलाभूमौनिपतंतीतदालिंगनमिच्छंतीस्मरंतीवाहमहाभु
जेति नचदूरेस्थितत्वात्राहमस्मीतिवक्तव्यमिति।।आह।।मेमांप्रतिसन्निधिंदर्शयसन्निहितोभवेत्यर्थः कुतः दास्याःत
त्रापिकृपणायाः अन्यथामदंत्यदशायांसत्यांत्वयानुतप्तव्यमतएवेत्याशयेनाह हेसखेतिप्रियवयस्ये यद्वा सन्निधिंदर्शनेच
कापिवंचनापूर्ववन्नकार्येत्याह सखेपरमविश्वासास्पदेति।।अथवा।।ननुप्रियतमेत्वंहितत्वानाहंकुत्रापिगतोस्मित्वदंतिकएवव
र्त्तेइतिचेत्तर्हिविमहंमुग्धानपश्यामि सखेनात्वमेवात्मानमभिव्यंजयेत्याह।।दास्याइति।।अन्यत्समानं यद्यपिविरह ८१

वैकल्येनानुसंधानापगमाद्विलापेर्थसंगतिर्न्नोपेक्षते अ संगतिश्च गुण इव तथापि तादृशीनां यत्किंचिद्वाक्यमेव सर्वार्थ
ः सेवते इति यथा भक्ति किंचिल्लिख्यते एवमग्रेपि ज्ञेय ततश्च सा विमुग्धहं तत्र भूमावपतदिति ज्ञेयं अग्रे मोहितामित्युक्तेः अ
थ वा स्कंधमारुह्यतामिती सूक्ते प्रेमोत्कंसकृतेन वैचित्येन पुरावर्तमानस्यापि कृष्णस्य तयानवलोकनाद्दत्त दृष्टे कृष्णे इत्यु
क्ते वस्तुतस्तु कौतिकित्वाद्देव स तत्र तूष्णीं स्थितः ततः प्रेमवैचित्यभाजस्तस्याः अनुतापः अथान्यागोपीः सन्निहिता दृ
ष्ट्वा कृष्णेनांतर्हितमेवेति ज्ञेयं अन्विष्यंत्यो भगवतो मार्गं गोप्यो विदूरतः ददृशुः पृयविश्लेषमोहितां दुःखितां सखीं ॥ वि
दूरतः अत्यंतदूरेपि ददृशुः तस्याः कांतिविशेषतः ॥ यद्वा ॥ विदूरतोन्विष्यंत्य अग्रतो दूरं गत्वान्वेषयंत्य इत्यर्थः ॥ यद्वा
अकारप्रश्लेषेणो अविदूरतः निकट एव ददृशुः ततश्च निजवैकल्यभरेण निकटेपि पूर्वं तस्यास्तमार्तस्वरं नशुश्रुवु
रिति ज्ञेयं पृयस्यामी कृष्णस्य विश्लेषाद्विच्छेदात् दुःखितां पश्चान्मोहितां च भूतलविलुठनलग्नधूलिकंटकक्षततरक्त
स्वेदाक्तसर्वांगत्वादीनां व कुलाश्रुधारालालापंकिलमुखवस्त्रनत्वादीनां लक्षणेनां ता दृश मोहस्य च तद्विश्लेषं विना
न्यथानुपपत्तेः मोहितामित्यनेन सर्वाभ्योऽन्याभ्योऽस्याः प्रेमविशेषोपि दर्शितः तासांहि विरहात्प्रोचमणादिकं अस्यास्तु
चरमदशा तुल्यो मोह इति सखीमिति तां तादृगवस्थापन्नां दृष्ट्वा सख्येन तुल्यव्यथा एव विशेषतश्च द्विगुणितनिजवेदनाः
सर्वा अपि परिवृत्त्यैं रुरुदुरित्यर्थः विश्लेषेस्त्वत एवैर्षादेरपगमात्र तथापश्चाद्दृष्ट्वा प्रयत्नेस्तांस तां विचित्रचातुर्येश्च

स्वस्यतांप्रानैरीकृ प्रापयामासुः ततश्चान्याश्चास्पतद्वृत्तंपप्रच्छुरितिचज्ञेयं तयाकथितमाकर्ण्यमनेत्राभिंच माधवात् अवमानं
स्वदोरात्म्यादिस्मयंपरमंययुः ततस्तयाकथितंसर्वमितिशेषः यद्वापुनर्दुःखोदयभयेनत्ताभिरप्युक्तं प्रपिसखीनांसमागमा
४२ त् स्वयमेवविलापरूपेण वर्णितं तद्वृत्तमितिशेषः इतिपृथग्वाक्यमेकमेवद्वा ततश्चमानेप्राप्तिमाकर्ण्यएवमग्रेपि यद्वाक
थितमेवाभिव्यंजयति मानेत्यादिना अवमानंपरित्यागलक्षणंचनिजदौरात्म्यान्मानादिलक्षणपदाकर्ण्यचकारात्मयामुभ
योरेवप्राधान्यंद्योत्यते तत्तत्प्रकारेणस्मरणात् तथा कस्मादेव रसावसरेंतर्हीतात् माधवात् लक्ष्मीकांतादपीति यद्वा मध
नामधरः रसेनक्रीडतिसदेति तस्मात्मानप्राप्तियोग्यामन्तोप्यधिकाकाचिदन्येन। नन्वहं। तथापिकेवलंतत्का रूपमाहिम्नैवनच
निजगुणैस्तादृशंमानेप्राप्नोतिभावः एवं भङ्ग्याश्रीभगवत्कारुण्यादिगुणातएव अनंतंचसर्वनिजदोषादेववक्तव्यमंत
व्यंचेतिसाधूनपिशिक्षयामासेतिज्ञेयं यद्वा श्रीकृष्णाद्दूरे आत्मास्वयंयस्याः दूरेआत्माश्रीकृष्णो वायस्याः सादू
रात्मातद्भावोदौरात्म्यंतस्मात् तद्दूरगमनादित्यर्थः परमंविस्मयंसद्यएवतादृग्अनुग्रहनिग्रहाभ्यां ततः परम
प्रेमवैयग्र्येणतयासहिताः पुनरप्यन्वेषयामासुरित्याहत इति ततोविशन्वनंचंद्रज्योत्स्नायावद्विभाव्यते तमः
प्रविष्टमालक्ष्य ततोनिववृतुर्हरेः यावद्वनंव्याप्यज्योत्स्नाविभाव्यतेलक्ष्यतेतावद्वनमविशन् प्रविष्टपतमन्वेषयां

मासुरित्यर्थः तमसा प्रविष्टं अन्यत घनत्वादंधकारमयमालक्ष्य ततस्तस्माद्धनान्निवृत्ताः २ तत्र तदन्वेषणासिद्धेः तथा च
श्रीविष्णुपुराणे ॥ प्रविष्टो गहनं कृष्णः पदमत्र न लक्ष्यते निवर्त्तध्वं शशांकस्य नैतद्दीधितिगोचर इति स्त्रिय इति स्त्रीणामं
धकारवनप्रवेशसामर्थ्याभावादित्यर्थः हरेरिति पाठोत्र केषांचिन्मतः स च श्रीस्वामिपादानां असम्मतो लक्ष्यते तेन तु
इति पुनरुक्तेः समाधानार्थं तत्पदस्यैव हरेरन्वेषणादिति व्याख्यानात् अन्यथा तत इत्यस्य प्राग्लिखनायोगः हरेस्त
न इत्यन्वयाद्यसोऽश्वं वा तथापि स्वगृहान्नगच्छेयुरिति किं वक्तव्यं न च स्मृतवत्योपीत्याह ॥ तन्मनस्कास्तदालापास्त
द्विचेष्टास्तदात्मिकाः तद्गुणानेव गायंत्योनात्मागाराणि सस्मरुः ॥ आत्मागाराणि स्वतंत्रमनोज्ञसुखमयानीत्यर्थः
किंवा गृहकृत्यसार्थमभ्यासवशेन गम्यानपि यद्वा आत्मानं देहं देवत्तं वा आगा[illegible]गृहाणि देहगेहानि वा इति
भोक्तृभोगसाधनभोग्यान्युक्तानि तदस्मरणे हेतुः तन्मनस्का इत्यादिपदत्रयेण तस्मिन्मनोवाक्कायाभिनिवेश
उक्तः तत्र मनसोऽभिनिवेशः तद्गुणादिस्मरणेन तद्विषयकविविधसंकल्पविकल्पकादिना वा वाचः अन्योन्यं त
शानप्रकारोपिदर्शितः सभाजयित्वेत्यनुवादः प्रश्नार्थेसभाजनस्यसम्यक्त्वविवक्षया किंवापुनर्विशेषेणसंमान्येत्यर्थः यतः अनं
गं अंगरहितमपिकामंदीपयन्तिसांगीकृत्यपूर्वंतोपिप्रकर्षायन्तिइतितथात्तं अत्यंतकंदर्पविवर्द्धनमित्यर्थः अतएवतासामंकेकृत्तयोः
नाभिस्तैनैर्नवाम्यस्तयोस्तस्यांघ्रिहस्तयोः अंके हस्तस्य किंवा अंघ्र्योर्हस्तयोश्चेत्यर्थः सम्यक्स्पर्शनेनविविधपरिपाद्याशनैः
शनैः सुखसंवाहनेनएवमपिपूर्ववदैश्वर्यंदर्शितं सर्वाभिरपिद्वयोरंगयोश्चतुर्णांवातेषांयुगपत्संस्पर्शनात् सम्यक्कृत्वा
प्रश्नविशेषार्थेतदुत्तरप्राप्त्यर्थंच ईषत्संक्षेपेणएवभावरे परमवाग्मित्वात् ततश्चकुपिताइतिपूर्ववदुःखप्राप्तेः किंवातेनकपटा
तिरेकेणकंचनात् यद्वाकोपंविनाअभिप्रायाज्ञानेनहृद्यप्रत्युत्तरालभ्यत्वादिति अन्यत्तैर्व्याख्यातं यादृग्जातादृशाभ्युवाकृत्वात्र
नगादीपनं किंवानत्येवसभाजयित्वा नाभिस्तस्यतथासभाजनमेवयुक्तमित्याशयेनाह अनंगेति उभयाननुभजतोऽभजतश्च
इतिप्रश्नत्रयं तच्चाकृतज्ञत्वादिपरिहारेणपुनः परित्यागाकरणदार्ढ्यार्थं साधयथास्यात्तथाएतद्ब्रूहि तेनेके किंवातेषां
फलं तत्सर्वंविविच्यास्मान्प्रतिसुबोधंकथयेत्यर्थः भोइतिसंबोधनेनावधापयेत्ति तत्रनिजदोषपर्यवसानेनतस्यमनो
ऽनभिनिवेशात् स्वार्थः निजदृष्टमात्रफलार्थएवतस्मिवाएकांतः तस्मिन्नेवैकस्मिन्नंतेनिष्ठायस्यतथाभूतउद्यमोयेषां
ते इतिश्रीगुरुसेवमिथ्योवैष्णवैः प्रणामादिकंचपरिहृतं तत्रतत्रसद्धर्मादिसद्भावात् आत्मानमेवेतिलोकदृष्ट्यापरोपका

रसंभावित्तं धर्मादिकंनिरस्तं प्रत्युपकारापेक्षयैवभजनात् एवं दोषपरिहारापेक्षयाप्रत्युपकारेपि धर्माद्यभावः नद्याजजनेतारत
म्याभावोप्यूह्यः अन्यथा उपकारप्रत्युपकारयोः स्वत्पफलाभावेनानुभजनासिद्धिः एवमेवानुभजंतीत्यत्रापि यावत्भजनानुसारेणभजंती
तिप्रश्नस्योत्तरं सिद्धेत् अतोयत्रप्रत्युपकारापेक्षापि तत्रधर्मइतिसूचितं हिनिम्स्रयेनान्यथा उक्तादन्यप्रकारेणतत्रमिथोभजनंन
100 स्यात् यद्वा तत्रतत्रमिथ्यात्वंनास्तीत्यर्थः सखेनैवकथनात् यद्वा आत्मनोपि तासुतादृशभजनाभिवकारुण्यभरेणमन्वा
नः सहजसख्येनतत्परिहरन्संबोधयति हेसख्यइति अन्यत्रैर्व्याख्यातं तदितिपूर्ववदेव अतइत्यर्थबलादायान्येव यद्यपितत्रा
प्यन्यान्यमुपकारेणदृष्टसुखंघटेत तथापिस्वोपकारजनित्वात् प्रत्युपकारस्यावश्यापेक्षत्वात्स्वधर्माभावेनतात्विकत्वात्तैर्भावादपि
विचारेणसुखंनावएवपर्यवस्येदिति नचसुखमितिव्याख्यातं यद्वा उन्मत्तवन्नीयतामित्यादिवत् लेखपकभ्रमेणैवतत् वक्ष्य
माणानुसारेणात्तदनपेक्षत्वात् स्वार्थोद्यमितिपाठोपिश्रीवित्सुखादीनांबहूनांसंमतः ततश्चतज्जनमन्यार्थंप्रतीयमानम
पिस्वप्रयोजनार्थमिवेत्यर्थः अन्यत्स्पष्टं अथवास्वार्थमेव उद्यमोयेषांजनानांतेहिते यथाराजसेवकाः वित्तदेवे
तनिकादयः हिप्रसिद्धौ अतएवप्रायोलोकानांसर्वेषामेवदृष्टार्थपरत्वात् तेविशेष्यस्यपष्टंननिर्दिष्टाः अभजतः दैत्यादीन्मा
वात्सल्यादिनाच वैप्रसिद्धौ तथोतिदृष्टांतेननिरूपाधिसहजकारुण्यमभिप्रेतं नेहिश्रीभागवताएव तत्कृतसंमतत्वकृतात्म
नामित्यत्रतैर्व्याख्यातमेव तथापिकारुण्यः पितरौचेतिचकारेध्याहार्यः निरपवादः संपूर्णइत्यर्थः तैः प्रत्युपकाराद्यन १००

पेक्षया केवलमत्यंत कृपालुत्वेनैवोपकारात् सौहृदं च निरूपवादं तयोः सहजास्निग्धत्वात् केवलसौहृदोक्तिः पुत्रपालने
पित्रोर्धर्मानुत्पत्तेः यद्वा कथंचित्तेनापि तयोर्धर्मोद्भवस्य तत्रश्रुते ह्यं तयोस्सस्तत्त्वेति हे सुमध्यमाः हे सुंदर्य्यः
तितदेव सौंदर्य्यमिति यद्वा तत्र युष्मासु भास्येवेति भावः इदं च तासां सामात्मभजनार्थं चातुर्यं वै एव नैव भजंति हि
तो निश्चयेवा न कृतं तदृजं वेजानंति अनुसंदधतीत्यकृतज्ञाः लोकाद्यपेक्षावत्त्वे पित्र्युपकारसामर्थ्येप्यज्ञानेन न तद
करणम्मूर्खा एवेत्यर्थः एवं तेषामज्ञत्वेनाभजनमभिप्रेतं सामर्थ्यं च तेषां ज्ञात्वापि ये न भजंति ते त्विति निर्द्दिश्य इत्याह गुर्वि
ति एवं तासां मते श्रीभगवतो विचित्रक्रीडया आत्मारामता आत्मकामता च न घटतेत्येव गुरुशब्दप्रयोगेण गुरुध्रु
क्त्वा च नत्रेया विरहार्त्तिदत्वेन भजनासिध्या प्रथमपक्षद्वयं च न संगच्छेत तत्राकृतज्ञतैव परिशिष्यतेति तथा
चाग्रे वक्ष्यते अकृतचेताइत्यादि श्रीविष्णुपुराणे श्रीवल्लदेवयाने च अकृतज्ञध्वजे ह्यस इति अत एव तैरपि व्या
ख्यातं अकृतज्ञत्वं तद्वचनेनैवेति चरमकोटिगतिमिति तत्रापि चरमकोटित्वं घटत्येव यद्वा गुरुध्रुकृपदेन पदार्थो न चे
तयारलत्तण येवनैरतिकठिनइति व्याख्यातं तस्यैव चरमकोटिगतत्वं सुसंगतमेव तु शब्दे भिन्नोपक्रमे आत्म
रामत्वादिचातुर्विध्यारहितोप्यहं न भजामि नत्रः सर्वदोषप्रयोगः स्वभावेनैव स्वस्य यत्रत्तणपत्यापरमवे योगम्यात्

101

हे सख्य इति आत्मत्वादिराहित्यमेव साधितं अन्यथा सख्यासंभवः जैत्रनितिविचारविशेषराहित्यमभिप्रेतं अन्यथास्व
त एवानुवृत्तिसिद्धिः ननु अस्माकं त्वय्यनुवृत्तिः सदानुवर्त्तत एवेति चेत्सत्यं विशेषेण तत्संपत्यर्थमिति स दृष्टांतमाह
यथेति विशेषतो न चेद् इति पुनः प्राप्तिसंभावनानिरस्ता अत एव नितरां भक्तो व्याप्तः एवमित्यस्यानुवृत्तय इत्यनेनान्वयः हे
अवला इति तत्र स्वतः शङ्काभावं सूचयति पृथ्वे पृथ्या इत्यस्योत्प्रियत्नेन सम मतिरोधाताद्यपराधो न ग्राह्य इति भावः अन्य
नैर्व्याख्यातं यद्वा एवमित्यस्य समयेत्यनेनान्वयः तादृशचिंतानिर्भक्तेन समये समर्थः तत्र हेतुः मदर्थेति अत एव परो
क्षमपि भजते वप्रेमात्लापं शुरु एवतागुणगायता भावविशेषं युष्माकं स्मारतां केवलं तत्र क्षीनमात्रेणैव स्थितमित्यर्थः
अथवा अनुवृत्तिवृत्तये इत्युक्तं सा वकी दृश्यत्यनुवृत्तिस्तां दृष्टांतेनाह यथेति अतोऽस्य पूर्वेणैव संबंधः हे सख्य इत्यनेन र
त्व युष्मानधिकृत्यनोच्यते सहजसख्यादिति व्यंजितमेवाभिव्यंजयाति एवमिति हि अपि युष्माकमपि मय्यनुवृत्त
येकिं अपितु नैव कुतः एवं तादृशचिंतानिर्भतया मदर्थमेव नान्यत् किंचिद् दृश्यत उक्षिता उपेक्षिता लोकाश्चतुर्द
श भुवनानि श्रीवैकुण्ठादयः अतो वेदा स्मृत घोषित कर्मानादरात् अत एव स्वाश्च पतिपुत्रादयो याभिस्ता
सां स्वत एवमायिनिरंतरविशुद्धसरमानुवृत्ति वृत्तेरित्यर्थः एवं मुमुक्षुभ्यो मुक्तेभ्यश्च भक्तेभ्योऽप्यासां विशेषो दर्शितः १०१
तेषां तत्तदपेक्षासंभवात् तादृशभावाभावाच्च ननु तर्हि किमर्थमधुनैवांतर्हितः तत्राह मयेति परोक्षं भजते इति कुत्रापि

मयातिगतमासीत् किंतु युष्मदंतिके एव वर्त्तमानेन परोक्षं मदगोचरं धिया युष्माभिः क्रियमाणं विचित्रप्रेमालापादिकं भजता
हेतांशं तच्छ्रोतुमित्यर्थः एवं कितवयोषितः कस्त्यजेदित्यादिपरिहृतं यद्वा अपरोक्षं साक्षादेव भजता तिरोहितं युष्माद्दृ
ष्टिमात्रेण स्थितं तथापि प्रियजनदुःखहेतुत्वेन दोषः स्यादेवेति चेत्तर्हि दोषतया मिताशयेनाह प्रियं प्रिया इति यद्यननुतदपि
किमर्थं तत्राह प्रियं प्रिया इति प्रियाभिः सह प्रियस्य तस्य क्तमेवेति भावः यद्वा तत्परोक्षभजनं प्रियं प्रियस्य तं मां सहज
मत्कौतुकरसेनेत्यर्थः अहो वत्तेदं साधककौतुकं यत्प्रियजनप्राणैः सहक्रीडनमिति चेत् तत्राह प्रिया इति प्रेमरूपत्वादपि
प्रीतिविशेषायैव स्यादित्यर्थः यद्वा तत्तथापि माशब्दद्वयं निषेधे प्रकृतमर्थं गमयति अर्हेत्यर्थः कुतः प्रियं प्रियाः प्रि
यस्य प्रियास्तु तथाकर्त्तुमयुक्तत्वादित्यर्थः एतच्चानुनयनचातुर्यं अन्यत्तन्त्रं तत्र समानो च इति संबोधमात्रेण बहुश्रु युष्मा
न्प्रतीत्यर्थः स्वसाधकत्वं स्वीयं प्रत्युपकारकृत्यं न पारये कर्त्तुं न शक्नोमि यद्वा वो युष्माकं यत् स्वीयं असाधारणं
साधुकृत्यं तद्दातुं न पारये तत्र हेतुः निरवद्यास्सर्वनैरपेक्ष्येण सर्वोपाधिराहित्येन निर्मलप्रेमविशेषेण च निर्दोषा
संयुक्संयोगः साम्पगमद्विषयकता दृशाकामस्य महाने वगुणेऽभिप्रेतः निरवद्यसंयोगहेतुत्वात् किंचयद्
ति दुर्जरा अच्छेद्याश्च विगेहशृंखला गेहा निगेहसंबंधिपतिपुत्रादयस्ता तदर्थकृत्यानिश्चतान्यैवं मंत्रखलाः कृ

तितामपि बंधहेतुत्वात् ताः संवृश्च्य भजन् भवत्य इति प्रेमगौरवेण प्रतोममत्ता दृशात्वाभावान्न पारये इत्यर्थः अन्यैर्वा ख्या
तं यथा मुमुक्षुः असाधुकृत्यं मद्विषयकं नैष्कर्म्यादिकमपि किमुत साधुकृत्यमित्यर्थः इदं च ताभिः सह स्वच्छंदेन
102 सदा क्रीडालोभेनोक्तं अपारणे हेतुः निरवद्यनिजांगमात्मानं वा संयुजे इति समर्पयंति इति तथा तासां किं च दुर्ज
राः गेहस्पृंखलाः नित्य गोपालनादि दृढकृत्यनिबंधान् सर्वबंधजनानुवृत्ति बंधांश्च संवृश्च्य या भवतीरहं माभ
जंमसेवितवानस्मि शृंखला मिति पाठे पि तथैवार्थः दुर्जरेति विशेषणेन शृंखलारूपकेण च निजप्रात्याप्यच्छेद्य
त्वं संख्या देन च आसक्तिः किं चित्त्यागे पि वहिस्त्यागासामर्थ्यं किं वा संछेदनेच्छायामपि सत्यासामर्थ्यं ध्वनि
तं युष्माकं हृदात्मानर्पणेन सर्वथै निरपेक्ष्याभजनेन न च प्रत्युपकाराशक्तिः अतएव ये यथा मां प्रपद्यंते तांस्तथैव भजा
म्यहमित्यादि निजवचनव्यभिचारापत्तेश्चाहं युष्माकमृणी एवेत्यर्थः इति सर्वथा प्रत्युपकारासामर्थ्योक्तिः अये
चक्षुरेण यकुलहृध्यायां ते श्रीरुक्मिण्यै प्रत्ययमेव वक्ष्यति वयं प्रतिनंदयया मइति अत्र च प्रतिनंदनोऽप्यशात्त्या
केवलमन्येत्वमेवापादयन् अतस्तस्याः सकाशादप्यासां विशेषः प्रसिद्ध एवेति निजोच्छिष्टप्रसादस्य
प्रदानेन सदानुगृह्णंति धत्ते यमूस्मै श्रीधरस्वामिनेनमः इति श्रीदशमे द्वात्रिंशः ॥ ॥ रासली
लामयस्येषा जगदेकमनोहरा यया श्रीव्रजदेवीनां श्रियोपि माहिमाधिकः इत्थं द्वंद्वी भगवतः तादृशाव १०२

चनादिनानिजाशेषभंगवत्तांप्रकटयतः अतः सुपेशलाः परमसुमनोहराः विरहः भूतो भावीतज्जंतापंदाहं जहुः पू
र्वमुक्तस्याप्यस्यात्रपुनरुक्तिः विरहेप्यपरिरंभजनात् तयाविशेषतो निजजागरितादिप्रतिपादनेन पुनर्विच्छेदस्प
मननाद्बाधनेवसस्पर्क्ता पत्पाग विवक्षया यतोगोप्यः सहजप्रेमरसपरिप्लुतचित्ताः स्मर्थे: किंच तदंगेति आलिंगन
करग्रहणादिनासंपन्नमनोरथाः सत्यः यद्वा भगवतएव विशेषणं सुपेशलत्वात्स्वेनुलेनतासां गोपीनां अंगे रूपचित्ता
शेषइति अतएव रासक्रीडामारभत आसनं विसायकर्तुं प्रवृत्तः गोविंद इति श्रीगोकुलेंद्रतया तत्रनिजाशेषैश्वर्यवि
शेषप्रकटनेपरमपुरुषोत्तमता स्त्रीरत्नैरिति तासां च सर्वस्त्रीवर्गश्रेष्ठतापोक्ता इति रासक्रीडायाः परमसामग्री
दर्शिता तामेव प्रथयति अनुव्रतैस्तदनुकूलैः स्तत्सदृशाकलाभिज्ञैरित्यर्थः अतएव प्रीतैः उल्लसितैः यद्वा तत्प्रे
मभरविवशैः अतोनुव्रतैस्तदेकाधीनैः अतएवान्योन्यमाबद्धबाहुभिः बाहुबंधनकराज्ञेयाः अन्यथानेत्स्यादि
सौंदर्यसंपत्तिः अन्योन्यत्वंच तासामेव नतुतेनसह तद्वद्गुम्फितासां प्रत्येकमुभयतः कंठग्रहणात् एतच्च
रासक्रीडालक्षणं तथाचोक्तं नटैर्गृहीतकंठीनामन्योन्यात्तकरश्रियां नर्तकीनां भवेद्रासोमंडलीभूयनर्त
नमिति अयमस्मिन्मंडलीमध्येऽत्रैवास्तांनचनिःसर इति आवरित्यादिशब्दग्रहणाभिप्रायः रासः परमरसकदं
बमयइति श्लेषार्थः सएवोत्सवः क्रीडाविशेषरूपं पर्वसुखविशेषसाधनसारसमुच्चयोवा हसेनपरमानं

दधनमूर्त्तिनाहेतुनासम्यक्प्रवृत्तः इतिसंप्रवृत्तोरासस्यकर्त्तृत्वनिर्देशेनप्राधान्योक्त्यास्यसर्वतोवैशिष्ट्यंस्तेयं सम्प्र
कूलमेवदर्शयति गोपीनांमंडलेनमंडितइति तद्विष्णुधर्मोक्तः श्रीपराशरेण रासमंडलिवंधोपिकृष्णपार्श्वमनुग
103 ता गोपीजनेननैव भूदेकस्थानस्थिरात्मनाहस्तेप्रगृह्यचैकैकां गोपिकांरासमंडले) चकारतत्करस्पर्शेनिमीलितदृशं
हरिः ततःप्रवृत्तेरासश्चलद्वलयनिःस्वनः अनुयातशरत्काव्यगेयगीतितिरनुक्रमादिति किंच तासामिति
तथाचोक्तंश्रीविल्वमंगलेन अंगनामंगनामंतरामाधवोमाधवंमाधवंचांतरेणांगनाएगइत्यमाकल्पितेमंडलेमध्य
गः संजगौवेणुनादेवकीनंदनइति एतदनुसारेणसर्वमध्येमीटीभूतः शंकुस्थानीयएकोबोधव्यः अन्यथामंडलेपा
र्श्वद्वयस्थगोपीद्वयकंठग्रहणेनवेणुधारणासिद्ध्यारासमहोत्सवेपरमंमंगलमधरमोहनतद्वयाभावपत्तिः तदपि
प्रायेणैववक्ष्यते मध्येमणीनामित्यादि स्त्रियइति स्त्रीसत्पुरुषस्पतथैकतत्संयुक्तामितिबोधयति अन्यथावैषम्ये
णदोषापत्तिः सुखभंगश्चेत्यर्थः एकस्यैवतथाप्रवेशः सर्वासांचप्रत्येकंयुगपत्कंठग्रहणंतथापिताषांस्वनिकटत्व
मानः तत्रचपार्श्वद्वयेवर्त्तमानस्यापेक्षत्वेनैवमानः तत्रैकंचितत्तदलंदितमित्याद्यशेषासमंजसंसमाधदाह
योगः अचिंत्याद्भुतशक्तिविशेषवस्तस्येश्वरेणेति द्योराकाशंडोकोनिवासोयेषांइतिस्वभावतएवव्योम्निभ्रमतानि
कस्माद्रासक्रीडादर्शनात्संहृत्यस्थितानामित्यर्थः अतएवविमानशतसंकुलंनभोबभूव यद्वाद्यौः स्वर्गः तत्र १२
स्थस्वर्गोपितादृशोत्सवासद्भावः तेषांस्वस्वेसेवायावरेवसरोपिसूचितः अतएवात्योत्सुक्येति इत्यसमये

ष्यागमन दोषः परिहृतः अथवा एतेरेव लुब्धी भगवत्क्रीडायां अंतरिताः परिकरादेर्विविशो वा ज्ञेयाः अत एव वैकं
दिवौकसां तत्क्रीडोपकरणत्वेन सदा सावधानं व्योम्न्येव वर्तमाना मित्यर्थः एवमन्यत्राप्यूह्यं ततस्ते व्योदिवौको
स्यः किंवा नंदनं तरं स्वयमेव वनेषु दिव्यत्वात् महामंगलोत्सव स्वभावात् एवमग्रेपि आर्दुंदुभीनां नादो मंगला
रंभार्थं स्वस्व वर्गसंमेलनार्थं च निनेत्तरां पेतुः नि शब्देन वृष्टरूप इति व कृत्वेन चरंगस्य स्वप्रसूनपुष्पास्तरणं किलजा
तमितिवोध्यते गंधर्वाणां पतयः श्रेष्ठाः अन्यथा तादृशानत्ययोग्यगानासिद्धिः तेषां श्रेष्ठसाफल्यासंपत्तिश्च सौ
भिरप्सरोभिः स्वपत्नीभिर्वा सहिताः इति सर्वेषामेव तदेकनिष्ठतोक्ता न तिष्ठति मलो यस्मादित्यमलं इति ते
षामपि कामादिदोषो निरस्तः एवं देवकृतोत्सवमुक्त्वा रासयोग्यं वाद्यगीतादिवत्त्कुमादो वाद्यमाह वलयानामि
ति किंकिणीनां कांच्यादिवर्तिनीनां घोषिना मितियोषित्वेन सामान्यत एव वलयादिसद्भावो न तु साधं भूष
णत्वेन ग्रहणादिति वोध्यते पूर्वं गृहेभ्यो निर्गमे ताभ्यां तदनपेक्षणात् सपत्न्याणमिति ताः सांप्रत स्पर्धेता वल
यि वगतस्य श्रीभगवतो पित्ता वद्दलयादिशव्दोभिप्रेतः रासेन यन्मंडलं मंडली वंधः किंवा रसस्येदं रासं यन्मं
डलं तस्मिन् यद्वा रससमूह मित्यर्थः भगवान्सर्वैश्वर्यशोभाभरसंपन्नोपि तत्र रासमंडले अत्यंतम्सुशुभे स्व
तो शोभ शोभा च रमकाष्ठागतस्यापि ताभिः शोभातिशयं पूर्ववद्व्यंजनसाधयति मध्येइति हेमानां हेमानि

र्गतानां हेमवर्णानां वा यथा महामरकतमणेरपि हेममणिमध्यवर्त्तितयैव शोभाधिक्यं स्यात् तथापि तस्यापि पृथग्जनाक्षे
षेणैवाधिकाशोभास्पादित्यर्थः तत्र हेतुः देवकीसुत इति प्रेमविलासार्थं देवकीजातत्वात् पृथग्जनविषयकप्रेमभ
१०५ रविस्तारणेनैव शोभाभरसंपत्तेरिति भावः देवकीयशोदेति पूर्वं लिखितमेव अन्यत्तैर्लिखितं यद्वा महामरकत
इत्येकत्वं वस्तुतो भगवत एकत्वस्यापि किं वा वेणुवादनार्थं मध्यवर्त्तिनोऽभिप्रायेण अन्ये केचिदाहुः स्वभावेनेन्द्रनी
लमणिवर्ण्णस्य सौन्दर्यागतिकौशलेन युगपदिव प्रत्येकं कण्ठग्रहणादिना ताः सर्वा व्याप्य भ्रमणात् तासां सुहे
मगौरिणां कोटिघटासंपर्कादिन्द्रनीलरूपामलमरकतमणिवर्णता जात्या महामरकत इत्युक्तमिति ततश्चान्त्य
शक्तिविशेष एव न तु कोऽपि भगवत्ताविशेष इति न केवलं ताभिः सोऽधिकं शुशुभे किंतु तेन ताश्च शुशुभिरे इत्याह
पादेति पदानां न्यासः नृत्यांतिभिर्भूम्याक्रमणेऽभंगपस्ते: भुजानां हस्तानां विधोवेण धुतिभिः हस्तकभेदनचा
लनैः यद्यप्यन्योन्यवद्धवाहुत्वेन भुजविधूतयो न संभवेयुः तथापि अन्योन्यवद्धाभ्यां वाभ्यां संहत्यैव वा किं वा
कस्यचित्तद्वर्त्तुमावद्धत्वपरित्यागेनैव यद्वा अन्योन्यावद्धानामपि भुजानां नृत्यगतिभंग्यैव ता बोद्धव्याः एवमग्रे
पि सर्वत्र तथैव ज्ञेयमिति स्मितसहितैः भ्रूविलासैः तत्तद्भावाभिव्यंजकनर्त्तनचातुर्यैः भज्यमानैः स्वभावतः
कार्श्येन विशेषतश्च नृत्यार्थपरिवर्त्तनादिना भंगमिव गच्छद्भिर्मध्यभागैः पटैः भगवदुत्थाने सति पुनः परिग १.४

हीतपनिनिजनिजोत्तरीयाल्लेव कृष्णस्य श्यामसुंदरस्य वधूः तदाश्लिष्टांगो रंगस्तदेकाश्रया इत्यर्थः तत्र दृष्टांतेना पिबं
जितमेव किं वा कृष्णस्य वधूः प्रियाः इति तास्सद्भावात्तत्त्वैदग्ध्यादिकं तत्प्रेममोहितत्वं च प्रयुक्तमेवेति भावः अतस्तमेव गा
यंत्यः तत्प्रकारश्चोक्तः श्रीपराशरेण कृष्णः शरच्चंद्रमसं कौमुदीं कुमुदाकरं जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः
पुनरिति विशेषणारतुः प्रक्षोभतं तत्प्रेमभरमौग्ध्ययोरन्योन्यसंवलने न तत्स्यैश्वर्यलौकिकत्वयोरैक्येनेव शो
भाभरसंपत्तेः नवितद्रवेति दृष्टांतेनान्योन्यशोभया तस्यापि शोभाधुनितेव चक्र इति नृत्यतिगति कौशलेन निजशक्ति
विशेषेणैव वनानानात्वमिव प्राप्तत्वात् किं वा मेघानां घटा घिवत्स्या अन्यथा मुख्यपामत्वाभावे शोभाद्यभावः
तस्यातिशोभानंतरं तासामतिशोभावर्णनं सर्वथा परमशोभाचरमकाष्ठागतानामपि रासक्रीडायां शोभाविशेष
संपत्त्या परमाद्भुतत्वात् ततस्त्वप्रहर्षोद्रेके एतासां नृत्तगीतविवृद्धिं किं वा नृत्यस्य प्रधान्यमुक्त्वा गानस्याप्याह
उच्चैरिति नृत्यमाना इति नर्तनेपि तादृशगानात्मकौशलविशेषं दर्शितः गानादिप्रयोजनमाह रतिसुरतं प्रे
मवा किं वा श्रीकृष्णप्रेमरसैव पथ्या यासां नचोच्चैर्गानादिना तासां संभ्रमः शंकनीय इत्याह कृष्णस्य चित्ता
कर्षकस्य परमानंदघनमूर्तेर्वा प्रेमसंदर्शनमुदिता इति गीतस्योच्चैस्त्वं दर्शयति यासां येन वा गीतेन आ
वृत्तत्वात् यद्वा यस्य गीतादेर्गीतेन लोका[illegible]दिना आवृत्तं तदेकरससमयमभूदित्यर्थः इति

तन्माहात्म्यमुक्तं अन्यत्तैर्व्याख्यातं यद्वा त्वत्पेनमानः श्रीकृष्णेनसंमानः यद्वा न्वसेनमानः कृष्णादप्याधिक्येनगर्वी
105 यासांताः रक्तकंठीप्रेमस्निग्धकंठः इतिगानस्यप्रेमसमयत्वेनपरममधुरत्वमुक्तं उच्चैर्गानेहेतुः रतीतिकृ
ष्णेतिचहृ यद्वाउच्चैःश्रीकृष्णादप्युच्चतया तथाचोक्तं श्रीपराशरेण रासगेयंजगौकृष्णोयावत्तारायतध्वनिः सा
धुकृष्णेतिकृष्णेतितावत्ताद्विगुणंजगुरिति तत्रहेतुमाह रक्तेत्यादिविशेषणैस्त्रिभिः एषांपदार्थः हेतुहेतुमद्भ
वेयं यद्यपितासामभिमर्शेनतस्तस्यापिमोदास्तथैवोच्चैर्गानंसंभवेत् तथापिरासगेयापेक्षयातदुच्चगीत
श्रवणेलालसेनवा नत्वाहंकृष्णंतोऽधिकेति अधुनापूर्ववत्तासुमुख्यानांप्रेमचेष्टितानिपृथक्त्वेनाह का
चिदितिसार्द्धपंचभिः मुकुंदेनपरमानंदपदेनस[?]मति ताद्दृशोन्नयनेहेतुः तथातेनतस्यजगतोपि
परमानंदप्रदत्वंध्वनि उन्निन्येमूर्च्छयामास यद्वा अपूर्वाः कल्पयामास अमिश्रिताः ततस्तेनमुकुंदे
नपूजितातेनसममुन्नयनेपि अमिश्रितत्वेनोन्नयनात् कथंपूजितातदाह साध्विति वीप्साहर्षसाध
त्वदर्शीयवावदितेतशेषः अन्यत्तैर्व्याख्यातं यद्वा अमिश्रिताः विशुद्धाः तथाचसंगीतसारेजातयो
ष्टादशप्रोक्तास्तासांलक्षणमुच्यते शुद्धाःस्युर्जातयःसप्ततःषड्जादिस्वराभिधाः ताएवविकृताःस १०५

त्पो जातः विकृतसंज्ञया इत्यादि किंच षड्जार्षभी च गांधारी मध्यमा पंचमी तथा धैवती चाथ नैषादी शुद्धाः एतास्तु जा
तय इति कांचिदित्यनुवर्त्तन एव वक्तव्य यथा स्यात् इति पूर्वतो प्यस्याः सामानाधिक्यं तेन च गानेपि कौशलमधिकं सूचि
तं पार्श्वस्थस्येति शीघ्रसुखग्रहणं बोधितं अन्यथा रासावेशेन स्खलनं संभवेत् किंच पार्श्वस्थत्वेन तस्यापि तत्र सा
वधानत्वं तस्याः पूर्वतोपि भावाधिक्यं सूचितं अतः परिश्रमादिकं तद्दर्थं केवलं छलमेवेति तेनैव रासश्रमेण कदाचि
द्यष्टिमेकां लीलया गदामिवावष्टभ्य बिभर्तीति गदाभृत् यद्वा गदति वर्णात्मकं शब्दं निगदती गदा वंशी तां बिभर्त्ति
गदाभृत् वंशीधरः तस्य सखीकरं परित्यज्य तस्य स्कंधं जग्राह परिश्रांतलक्षणं श्रुत्वा दिति तथा श्रीपराशरे
णाप्युक्तं परिवर्त्तश्रमेणैका चलद्वलयलापिनी ददौ बाहुलतां स्कंधे गोपी मधुनिघातिन इति मल्लिकापुष्पा
णां स्रवणं कवरात्क्षत्वा एकापि गोपी अस्य तत्स्कंधस्थितं स्वभावत एवोत्पलपुष्पतोप्यधिकं सौरभं यस्य वि
शेषतश्च चंदनेन अत्रासम्पक् भक्ति छेदादिसाधक प्रकारेणालिप्तं इति भावो दीपनत्वं सूचितं हस्यांस भुवने हेतुः
हृष्टरोमेति प्रेम वैवश्यादित्यर्थः स्वेदे एव रोमाण्यपि हृष्टानि तस्याश्चह? किं वक्तव्य इत्यर्थः अन्या च तु र्थ्यां
स्वगंडं श्रीकृष्णगंडे नाधेनश्रमव्याजेन संदधत्या इति भावः प्रकर्षेण अंसमुखयत्वाभावेपि तन्मुखप्रवेशनादि
चातुर्येणादात् नृत्यती नृत्यंतीइ यमेका गायतीगायंती च परा इति द्वेते ये कूजादिति नृत्ये गाने च परमावेशं

बोधयति पार्श्वस्थस्याच्युतस्य निश्चयेन ताः स्त्रियः पार्श्व एवास्थितस्य भगवतो हस्त एव अरुंतापहारित्वादिना तत्र श्रांतास
तीश्रमनिवृत्त्यर्थमिवेत्यर्थः एतच्च पूर्वमुक्तमेव शिवं स्वतः सुखरूपं एवं मुख्याः सप्तोक्ताः अष्टमी च काचित्परिलस
द्बाहुं परिरभ्य चुचुंबवत्तं गोपीगीतस्तुतिव्याजनिपुणे मधुसूदनमिति श्रीपराशरेणोक्तात्र ज्ञेया यद्वा नृत्यतीगायतीले
केव एवं षट् द्वे च मंडलमध्यवर्तिनः पार्श्वद्वये स्थिते श्रीराधाललिते नोक्ते प्रायोत्र मंडलस्यैवोक्तत्वात् यद्वा पूर्वव्याख्यानु
सार एव सप्तैवोक्ता ज्ञेयाः श्रीराधापदैव कांतस्य मंडलमध्यवर्तिनः सर्वपार्श्वपार्श्वस्थात्र नोक्तेति अच्युतं कस्माच्चिदपि रूपगु
णादिमाहात्म्याच्च्युतिरहितं सुस्थिरं वा कांतं रमणं लब्ध्वा तस्य दुर्लभत्वोमा कुः स्त्रियः एकांतेन एकनिष्ठया वल्लभं यद्वा स्त्रियः कां
तं आत्मनः स्वे कांत वल्लभं लब्ध्वा इति स्त्रियोपि सकाशात्तासां माहात्म्यमभिप्रेतं तदेव दर्शयति गृहीतेति तथा चगास्यते
श्रीमदुद्धवेन नायं श्रियोंऽग उ नितांतरतेः प्रसादः स्वर्योषितां नलिनगंधरुचां कुतोन्याः रासोत्सवेस्य भुजदंडगृहीतकं
ठलब्धाशिषां य उदगाद्व्रजवल्लवीनामित्यादि कस्ये ति तासां रासेन परमा शोभोक्ता यद्वा परिश्रांतिः सूचिता तथापि न
त्यहेतुमाह भगवतानिजाशेषैश्वर्यसारसर्वस्वं प्रकटयाता समिति तत्साहित्यस्य परममोहनत्वात् यत्तो गोप्यः तदे
कप्रेमपरवश्या इत्यर्थः तेन समित्येन तासां तत्सदृशवैदग्ध्यादिकमपि व्यंजितं तथा तासामभिवृत्तस्यापि कर्णोत्पला
दिकं सर्वं बोध्यते अन्यत्तैर्व्याख्यातं तत्र वादकेष्विति दुंदुभिनादाभिप्रायेण किंनरादिष्विति च दिवौकसामित्युक्तेस्तद् १०६

नर्गतत्वसंभावनयेति अथउत्कर्षतोप्यधिकं माहात्म्यमेवदर्शयति किंवा पूर्वगंधर्वपतिगानादिकमुक्तं अधुनारासरंभेण
तासांन कदाचिदन्यतोगीताद्यपेक्षेत्याह करेति अर्थः सएव परिष्वंगः गोपीनामाश्लेषः कराभिमर्षः तासामेवकरालभनं यद्वास्वक
रेणतासामभिमर्शः स्तनादिस्पर्शनं स्निग्धेक्षणंतन्मुखादीनांसरसावलोकनं उद्दामविलासः नीवीश्लथनादिः हासस्मितमा
कोद्रेकविलसितस्मितं रमायाईशः स्वामी इतिस्वामित्वेनतस्याः तादृशरसयोग्यता ब्रजसुंदरीभिरितितासामेवतद्योग्यत्वमभि
प्रेतालक्ष्मीतोपिभाववैदग्ध्यविशेषात् तमेवदर्शयन् श्रीभगवतस्तासांचमिथः साम्यंदृष्टांतेनाहयथेतियथाप्रतिबिंबेनसहार्भ
कस्यकापिवैशादृश्यंनास्तितथात्त[illegible]भिः कृष्णस्येत्यर्थः अनेनश्रीभगवद्वत्तस्यापिशोभासूचिता वैषम्येतदपत्तेरितितथाता
साभिमितिस्यापिप्रेमविकारोज्ञेयः सचोक्तः श्रीपराशरेणगोपीकपोलसंश्लेषमभिपत्यहरेर्भुजौ पुलकोद्गमसस्यायस्वेदां
बुघनतांगतविति अन्यतेर्व्याख्यातं यद्वाप्रतिबिंबेनविभ्रमोविलासोयस्यसोर्भकोयथातदेकनिष्ठःसन् अन्यात्किम
प्यजानन्रमतेतथायमपि यद्वाएवमुक्तप्रकारेणब्रजसुंदरीभिर्येपरिष्वंगादयस्तैस्ताभिः रेवसहरेमेसोपितादृशा
नेवपरिष्वंगादीनकरोदितिदृष्टांतेनाह यथेति अन्यत्समानं ततश्चतासामत्यंतानंदोजनीत्याह तदंगेति तस्यां
गैः सांगः आलिंगनादिनामिलनंअंगासंगः आकुलेंद्रियत्वलक्षणमाह तदंगेतितस्यांगैः संगः आलिंगनादिनामिलनं
अंगसंगः आकुलेंद्रियत्वलक्षणमाह केशानित्यादिना दुकूलंपरिधानकौशेयवस्त्रंकुचपट्टिकांउत्तरीयं उत्तरीयांतस्य

सूक्ष्मवस्त्रैर्वा तद्द्वयमेव वा व्रजस्त्रिय इति प्रेमभरविवशतया तादृशत्वं तासामुपपन्नतमेवेति भावः एवं तासामानन्दाधिक्यं सिद्ध
मेव अत एव प्रश्नाद्वः तच्च भवनाऽवबुध्यते इत्याशयेन संबोधयति हे कुरूद्वहेति कृष्णस्य परमानन्दघनमूर्तेः जगन्निगाक
107 र्षकस्य वा विशेषेण पूर्वपूर्वतोऽसाधारण्येन क्रीडितं क्रीडां विशेषतः साक्षात्स्वेवादिद्वारा प्रीत्याऽऽदित्वा कृष्णेन्यनेन तद्वि
क्रीडितस्यासितादृशत्वमेवाभिप्रेतं खेचरा देवादयः तेषां स्त्रियः सर्वा अपि कामेन श्रीभगवद्विषयकेणार्दिताः पी
डिताः सत्यः विशेषेण सर्व्वविस्मरणादिनाऽमुह्यन् श्रीकृष्णप्राप्तौ निजयोग्यत्वायोग्यत्वादिविचाररहितत्वेन विकलाऽभ
वन् नवं भीदृशां प्रादुर्भावो शोऽशोक इति शायेन साहित्य इत्यर्थः विस्मितोऽभूत् अदृष्टपूर्वत्वात् अन्ये तु व्याख्यातं तत्रातिदीर्घा
स्विति चिरकालस्वच्छन्दवकुलसुखक्रीडानां यथा निर्वधाल्पकालेन निर्वाहासिद्धिः अत एवाग्रे वक्ष्यमाणस्य ब्रह्मरात्र इ
त्यस्यार्थे ब्रह्मणोऽनुयुगसहस्रपरिमितायां रात्रौ गतायामिति केचिद्याचक्षते तेतदपि संभवेदेव भगवच्छक्त्याशेषविरुद्धसम
माधानात् रात्रिषु इति वकुत्वं च रात्रीरित्युक्तस्य निशा इति वक्ष्यमाणस्य चानुसारेणेति अथवा देवानां देवीनां च सर्वेषामे
व व्योमयानानां विमोहमाह खेचराः तास्त्रियश्च गणेशाद्वेन तत्पन्न्यः पराश्चतारकाः चकारात् सोऽपि सगणः
कामार्दितो व्यमुह्यदित्यर्थः अनेन वक्ष्यमाणरेतोनेभ्यो लज्जादिना संकोचो निरस्तः सर्वेषामेव विमोहात् तत्र
शशांकस्य कामो भगवद्विषयकभावविशेषलक्षणः एवं रासक्रीडाया श्रीविषयकभाववर्द्धनत्वात् तत्रापि 1.9

ताभिः सह तत्रापि संयन्ताभिः परमयोग्याभिर्व्रजसुंदरीभिरेव सुसिद्धेः तद्योग्यस्थाने श्रीव्रजेंद्रकिशोरेण तत्संभोगपरसायाश्च त्रसं
पादनामिति अत एवारंभे पूर्वमुक्तं तत्र गोविंदः स्वैरं रहैरिति परमफलमाह कृत्वेति द्वाभ्यां कृत्वेव इत्येकस्यापि शक्तिविशे
षेण नानात्वसत्पत्तापि स्मिन्नेव गोपयोषितः गोपद्गत्यर्थः ततश्च काश्चिद्विवाहिताः काश्चित्कन्याश्चेति यद्वा गोपानां योषितो
भार्याः ततश्च काश्चित्तेषां पत्न्य एव काश्चित्कृतकात्यायिनीव्रता भगवन्निष्ठा अजातविवाहा अपि कथंचिद्भगवन्मायादि
नासर्वैर्विवाहमननाद्भार्यात्वेन प्रतीता इति ज्ञेयं एतच्च श्रीरूपेण लिखिते ललितमाधवनाटकादौ व्यक्तमेव ली
लयाशृंगाररसखेलया विचित्रसौरतचेष्टया वा रराम रेमे भगवानिति तदेव भगवत्तासारसर्वस्वप्रकटन
मितिभावः तस्यैव प्रेमरसपरिपाकविलासविशेषात्मकत्वात् तथा च जगच्चिंताकर्षकेण तेनैव स्वतः प्रेमवि
शेषविस्तारणाच्चेति तच्चाग्रे व्यक्तं भावि श्रीभागवतामृते विवृतमेव आत्मारामोऽपीत्युक्तार्थमेव तद्रमणं
च पृथक् पृथक् तत्रैव निकटकुंजादिषु किं वा रासस्थल्यामेव तत्तदलक्षितत्वेन एवं च पूर्ववदैश्वर्यमाधुर्ये द्रष्टव्ये
रतिः सुरतं सैव विहारस्तेन इति तत्र रसिकता सूचिता यद्वा रतौ विहारः विविधविदग्धचेष्टया तेन यः विदग्धशिरोम
णिः परमप्रीतो वा श्रीकृष्णः श्रांतमेन परमसुखात्मकेन पाणिना प्रकर्षेण अमृजत् प्रस्वेदबिंदुप्रसरणालकसंवरणा
दिनोच्चलयामास यतः करुणः कृपालुः न च केवलमनाथेष्विव कारुण्येन किंतु परमप्रियत्वेनेत्याह प्रेम्णेति इति कारुण्य

विशेषोऽभिप्रेतः शांतमेनेति स्पर्शमात्रेणापि स्वभावतः परमसुखकरत्वं तत्र च प्रमार्ज्जनं तत्रापि कारुण्येन तत्रापि प्रेम्णे
108 ति परमसंतोषणमुक्तं अंगेति प्रेमसंबोधने एवमेकस्यैकेनैव पाणिना सर्वासां युगपद्वदनप्रमार्ज्जनादिस्थैर्येण लौकिक
त्वेन च पूर्ववन्मधुरभगवत्तासारप्रकटनं एवमन्यत्रापि ततः प्रहृष्टा निजदेहादिना त्रिधा तस्य प्रहर्षसंजननया मम सुस्मिता
ह गोप्य इति तत्र स्फुरदिति सौंदर्येण सुधितेति भावेन जगुरिति संकीर्तनेन ऋषभस्य पुरुषस्य श्रेष्ठस्य इति तस्य परम
वैदग्ध्यादिकमुक्तं तासामपि सिद्धिमेव अत एव तस्य मानं दधत्यः उक्तप्रकारैः संमार्जनं कुर्वत्यः यद्वा अहो मम धन्यत्व
मित्येतादृशं तस्य गर्व्वमर्प्पयंत्यः ऋषभत्वात् तत्कृतमामपि श्रेष्ठत्वं सूचितं तदेव दर्शयति पुण्यानि साक्षात्पुण्यरूपा
णि सुखात्मकानि वा जगुः तत्र हेतुः तस्य करुरुहैः स्पर्शोत्थानेन तदानीमेव तेन क्रियमाणात् किंवा पूर्वकृतात्
यद्वा सुखमार्जने गंडेषु जातान् प्रकृष्टो मोदो यासां ता इति रत्यादि परिश्रांतानामपि गाने श्रमाभावो रससिद्धि
प्रबोधितः ततः परमहर्षस्य श्रीभगवतोपि प्रेमान्वेषितमाह ताभिरिति त्रिभिः अमं तासामात्मनश्च श्रमापोहितुमप
नेतुं तत्र च सच्चिदानंदघनमूर्तेः क्रीडयामावेशेन परमवैदग्ध्यादिसूचनार्थं प्रस्वेदकणिकादिना सौंदर्यप्रदर्शना
र्थं च श्रमः संभाव्य एव अंगसंगेत्यनेन पद्मिनीस्त्रीवर्ग पूज्यपादानां तासां मंगतः स्वाभाविकामोदसंचारोऽभिप्रेतः
किंच स्वकुचेति अत एवानुद्रुतः स्रक्कौंदीज्ञेया कुंदस्रजः कुलपतेरिति पूर्वोक्तेः परमसुभगत्वेन कुंकुमरंजितत्वसंभवः 1.0

स्वकुल्लं वंधित्वेनः तदानीमलीनां तत्रास्थितिर्योग्यता तथा गंधर्वपतिसदृशा तान्तत्र तेषामेव गीतिश्च बोधिता एवंजलकाप्यां
कामोद्दीपनसामग्री च दर्शिता सः परमविनोदी कार्यमुत्तमं आविवेशाश्रान्तया प्राविशत् दृष्टांतो गजेंद्रस्य वद्भीर्भिर्गजीभिः
सहजलविहारास तया घनुसारेण अन्यत्रैर्व्याख्यातं यद्वा गंधर्वपा गायनश्रेष्ठाः गंधर्वोपनगभेदे स्पाकृायनेरबेचरेति
चेतिविश्वः तेच तेअलपश्चैतेः इति जलक्रीडायोग्यमुत्तमगीतमुक्तं यद्वा कान्भिः श्रीभगवदंगसंगेन घृष्टस्रजोयाः याश्च
निजकुचकुंकुमेन रंजितारत्यावेशेन सर्वांगेषु संपृक्ताः ताभिः अत एव तासां श्रममपनेतुं न केवलं तासामेव स्व
स्यापीत्याह श्रांत इति जलक्रीडामाह स इति परमकौतुकी अंभसि जलमध्ये इतस्ततः सर्वदिक्षु अलमतिशयेन
परितः सर्वांगेषु सिच्यमानोऽंभसि वस्वयं स्वातंत्र्येण रेमे यद्वा स्वयमपि तथैवताः सिंचन्नित्यर्थः युवति
भिरिति समन्तत्वं तादृशसेकसामर्थ्यं च दर्शितं प्रहसितीभिः प्रकर्षेण परिहसंतीभिः नेमोत्सुकेन तत्स्य भंगावित
र्केण वा तस्य तु तेन प्रेममेव विवृद्धमित्याशयेनाह प्रेम्णा प्रेमरसेन उक्षितः सिक्तः सन् पाठांतरे प्रेम्णा ईक्षि
तो दृष्टः अंगेति प्रहर्षसंबोधने वैमानिकैः विमानेन व्योम्नि चरद्भिर्देववादिवैतिः सर्वैरेव ततु क्रीडापरिकरूपैः
कुसुमवर्षिभिः परमानंदेन वृष्टि वद्बहुलपुष्पाणि क्षिपद्भिः सद्भिरीड्यमानः साधु साध्विति यद्वा तस्य भंगं वितर्को
वलवृत्यर्थामिवजयजयत्येवं स्तूयमानः ततश्च वैमानिकैरिति पुंस्त्वेन पुरुषैरेव स्त्रीणां विमोहनादिनातत्राशक्तेः

किंवा तासां व्रजे देवीपदयातित्वेन कुसुमवर्षादावप्रवृत्तेः अतः स्वयमित्यस्यात्रैवान्वयः स स्वयमेकमेवैतैः स्तू
यमानः अन्यत्रैवापरव्याप्तं यद्वा स्वेषु ज्ञानजनने एव रतिः रागो यस्य सः अतः स्वस्य जयादपि तासां जयेन संतोषवृ
109 त्तिभावः यद्वा न नु श्रीगुरोः कृपया तज्जलक्रीडां विस्तार्यैव वर्णये इति चेत्तत्राह स्वाग्रसाधारण्येति जलादिक्रीडाय
स्य सः अतो दृष्टांताद्यभावेन सा विस्तरेण वर्णयितुं न शक्यते इत्यर्थः एवमग्रेंतेव वक्ष्यमाणात् तथा श्रीहरि
वंशोदिता च द्वारिकाजलविहारादप्यत्र विशेषः सूचितः गजेंद्रस्य लीलेव लीला यस्य सः पूर्वोक्ताभिप्रायमे
व यद्वा तादृशजलसेके पि गजेंद्रस्येव स्वसुखभरविवृद्ध्या यायं दृष्टांतः ततो जलक्रीडानंतरमिति जलक्रीडया
पुष्पमालादेर्म्लानत्वादिना पुष्पावचयादिकौतुकार्थमित्यर्थः तत्र्यर्थे चकारोभिन्नोपक्रमे जलप्रसूनानि क
मलादीनि स्थलप्रसूनानि जातीकुंदादीनि तद्गंधसंवेधेनाऽनिलस्य सौरभ्यं प्रोक्तं च तुष्टेति मांद्यं च सूचितं
च चारपुष्पावचयनतत्साहित्येनैवागमनात् किंवा जलक्रीडयांगरागापगमेन सहजमधुरसौरभ्यप्र
काशात् किंवा तेषां भावोद्दीपनस्वभावत्वेन सदा स्वीकारात् किंवा श्रीमुखवनमालाद्यामोदेन सदा
कृष्टत्वात् अतएव तेषां मुकुरुतेः मदच्युदिति भृंगगणावृतत्वे हेतुता तथाद्विरदश्रेष्ठताकाममत्तता १०८
च सर्वत्रायं दृष्टांतः प्रायो मत्तगजेंद्रस्य काधिकता पाः यथा सदा गजीभिः सह स्वातंत्र्येण क्रीडया मिथः प्रीते

आपेक्षयेति अन्यद्(?) व्याख्यातं यद्वा भगवत्कार्यस्य क्रीडालोला: या: प्रमदास्तासां गणेनावृत इतितेषां प्रेममत्ततोक्ता
अत एव प्रमदेत्युक्तं एवं तत्रापि कृत्तरासक्रीडां मुक्त्वा तस्यामनुक्तमन्यमपि विलासं संगृह्णन् तथा बहुलरात्रकृतायां
मपि तस्यां तामत्ति दिशन्नुपसंहरति एवमिति उक्तप्रकारेण तितद्रात्रावीदृशी परापि क्रीडा साचात्यंतविस्तीर्णत्वाद्वर्णयितुं न शक्यत इति भावः तथा निशा इति वकुत्वेन तत्र च सर्वा इति साकल्येन संपूर्णे कैशोरं सर्वास्वेव रात्रिषु
रासक्रीडा बोध्यते श्रीपराशरेणापि तदुक्तमेव सोपि कैशोरकवयसि तत्र च कौमारं पंचाब्दं तं पौगंडं दशमा
वधि कैशोरमापंचदशाद्यौवनं तु ततः परमित्यादि वचनाद्दशाब्दमारभ्य पंचदशाब्दपर्यंतं गोकुले तत्र नित्यं
सा क्रीडा यायच्चोक्तं श्रीमदुद्धवेन तत्तीयस्कंधे एकादश समास्तत्र गूढार्चिः सबलो वसदिति तत्र च कौमार
पौगंडयोस्तद्योग्य वयसो रासक्रीडानुदयेन भगवत्ता विशेषप्राकट्याभावाद्गूढैश्वर्यत्वाभिप्रायेण अत एवो
क्तं गूढार्चिरिति अत एव रंगस्थलेपि तरोप्रतिश्रीभगवतैव वक्ष्यते नास्मत्तो युवयोस्तातेत्यादि — अथ मधु
पुरीप्रवेशे वक्ष्यमाणस्य प्रगल्भलीलाहसितावलोकेरित्यादेरनुसारेण कैशोर यौवने पि श्रीभगवतो गोकुले क्री
डा मन्यते तच्च नातीव संगतं कैशोरे पि तस्य वैदग्धी विशेषेण प्रगल्भलीलायाः संभवात् अन्यथा कैशोरे प्रथम
लब्धेना वितपकूर दृष्टेः तथा कैशोरे नाप्त यौवनाविति पुरस्तादुक्ते च विरोधः स्यादिति किंच एवमित्यनेन तद्रात्रि क्रीडा

यादृशी अन्यरात्रिक्रीडापि तादृश्यैवेति सूच्यते तत्र पूर्वरासक्रीडारंभे मिथो वाकोवाक्यस्य समाधानं लिखितमेवेति शशां
कः पूर्णचंद्रः पूर्णत्वेनैव शशस्य सम्यगुदयात्तस्यांशुचिर्विशेषणराजतादिनवत्प्रकाशिताः एवं श्रीभागवद्रासक्रीडा
र्थे तासु रात्रिषु चंद्रः पूर्णिमायामिव पूर्णमंडल एवोज्ज्वल इति ज्ञेयं यच्चोक्तं वैशंपायनेन एवं श्रीसकृष्णो गोपीनां चक्रवा
110 लैरलंकृतः शारदीषु सचंद्रासु निशासु मुमुदे सुखीति तत्र च शारदीत्युपलक्षणं किंवा शारदीष्विवेति ज्ञेयं य
द्वा मधुपुरीमध्ये श्रीवसुदेवकृतपुत्रपरिवर्तनादिवत् कल्पभेदव्यवस्थया भेदः कल्प्यः ननु नित्यमेव तादृशरात्रौ
नादृशरात्रौ प्रकारादिना कथं सा क्रीडा सिध्येत् तत्राह सत्यकाम इति ननु तथापि मानादिना पत्यादिपारवश्यादि
ना वासदातास्तस्या दुर्लभा मन्ये तत्राह ननु निरंतरं रतोऽनुरक्तः सर्वथावरुद्धवंधेन सर्वापेक्षया वासे बद्धोऽबलानां
तदेकाधीनगोपीनां गणो यस्मिन्निति तासामनुरक्तत्वेन सामरस्यप्रयुक्तेनापि यदा तदा येन केनापि प्रकारेण
सिध्येदेवेति भावः तत्र चासंभावना स्त्रीसाह सः महामोहनो रासरसिक इति न च कदाचित्कदाचित्केनापि हे
तुना तत्र त्रुटिः स्यादित्याह अवरुद्धं स्वीकृतं सौरतं सुरतसमूहो लीलाविलासोद्रेको वा येन सः तदर्थमेवेत्याक
सादित्यर्थः तच्चात्मन्येवेति न केवलं स्वयमौदासीन्येन ता एव रमयामास किंतु स्वस्मिन्स्वादात्स्वी
कारेण परमास्वाद्यस्य स्वयमप्यनुभूतवानित्यर्थः यद्वा आत्मनिमित्ते इत्यात्मारामत्वाद्यपेक्षया तस्याः वि ११
तेन परमानंदो वी[illegible]तः न केवलं मुक्तप्रकारा रासक्रीडैव कृता किंतु ताभिः सह विचित्रप्रकारेण विचित्रा

रतिश्च कृतेत्याह शरदिंदु इति शरदि कामस्य प्रावल्येन पुलिनोदकसौंदर्येणोक्तं यद्वा हायनोस्त्री शरत्समा इत्यमरोक्तेः संव
त्सरोक्तेः संवत्सरमध्येयस्मिन् ऋतौ मासे दिवसे वा याः काव्येषु कथा निरूप्यंते ताः सिषेवे तदर्थान् प्रीत्यानुस्थितवानित्यर्थः
तास्त्र श्रीगीतगोविंदविदग्धमाधवनाटकाद्युक्तप्रकारा ज्ञेयाः अन्यत्रैव्याख्यातं यथा एवं शशिषेव इति रात्रिषु रासक्रीडा उक्ताः अधुना कदाचि
द्दिवसेऽपि तादृशीमन्यामपि क्रीडां सूचयति सर्वा इति शरत्काव्यकथाश्च सर्वाः सिषेवे तत्र काव्यशब्देन परमवैचित्रीतासांसू
चिता तास्त्र गीतगोविंदादि प्रसिद्धाः तथा श्रीचंडीदासादिदर्शितदानखंडादि प्रकारकाश्च ज्ञेयाः एवं प्रीतिविशेष एव श्रीवा
दरायणिना वर्णितायाः श्रीरासक्रीडायाः श्रवणान्निर्घोषां कूणैर्विलोकनान्नामीषद्धृतां शुष्कतार्किकमीमांस
कादीनां केषांचिद्देवेसवानामभिप्रायं वितर्क्याक्षिपयन्तेषामिव हृदितार्थं तमुच्छ्राय्य देहव्याजेन पृच्छति संस्थापनायेति
त्रिभिः सम्यक्स्थापनाय खलु यस्य प्रवर्तनाय वर्तमानस्य च विघ्नतो रक्षणाय इत्यर्थः न केवलं तदर्थमेव किंतु इतरस्य
अधर्मस्य प्रकृष्टप्रशमाय सवासनोन्मूलनाय अन्यथाधर्मस्थापनस्याप्यासिद्धेः हि प्रसिद्धं संरक्षणाय धर्मस्येत्या
दिवचनेभ्यः भगवानिति ततएव भगवत्ताप्रकटनमपि स्यादिति भावः अंशेन श्रीबलदेवेन सह इति तत्र तत्राग्रहेऽपि
दर्शितः जगतामीश्वरः प्रतिपालकः अन्यथा जगन्नाशापत्तिरित्यर्थः स एव वाश्चायं धर्मस्य भक्तिविरुद्धाशेषधर्मस्य संस्था
पनं नष्टानंतस्मै प्रशमाय अंतनाशाय तादृशधर्मा धर्माभावे नैव रासक्रीडादिमहालीलासिद्धा निजावतारमुख्यप्रयोज

नासिद्धेः ननु स्वकृत वेदादि निबंधातिक्रमः प्रायः स्यात् तत्राह जगतां ब्रह्मादीनामपीश्वरः परमस्वतंत्रोयं कदाचिद्रसविशेषापेक्षा
पेक्षया तादृशमपि कुर्यात् तत्रास्य को नाम नियामकोस्तीत्यर्थः यद्वा धर्मभङ्गक्रिकृत प्रोक्तः इत्यादिन्यायेन भक्तिलक्षणो धर्मस्तस्य
।।। तरस्य तदतिरिक्ताशेषस्य मोक्षादेरपि अन्यतो परमाय यतो जगत्परिपालकः विघ्नविनाशनपूर्वकेण भक्तेः सम्यक् स्था
पनेनैव सर्वेषां स्वतः सुखसर्वार्थसंपत्त्या जगत्पालनसिद्धेः धर्मा एव सेतवः लोकरक्षा मर्यादाः धर्मे वैदिकनिबंधा वाते
षां वक्ता त्वादिवक्ता अन्यथा वाक्यव्यवहारयोर्विसंवादेन लोके रग्राह्यः स्यात् किंच अभितो रक्षितातत्प्रतिपक्षवधादिना वकु
धासंवर्धनेन च पालकः परदाराभिमर्शनं रूपं प्रतीपं धर्मसेतूनामिव धर्मसंस्थापनादेर्वा प्रतिकूलं ब्रह्मन् हे साक्षाद्वेद
मूर्ते प्रतीपाचरणेन वेदातिक्रमाद्वा दृशा विप्रकुलातिक्रमोपि स्यात् तच्च ब्रह्मण्यदेवस्य तस्यायुक्तमेवेति भावः यद्वा
ननु तातत्करणं मया ज्ञातुं शक्यतेमित्यर्थः अन्यत्रैकोरव्यातं यद्वा प्रतीपमाचरदिति अधर्मः उक्तः कृतो भिरक्षित
श्चेत्यर्थः तत्रः उक्तः मया परोक्षं भजता तिरोहितमित्यादिना कृतः साक्षादेव रमणात् अभिरक्षितः पुनराचरणात्
तेन लोके प्रवृत्तिसंभवाच्चेति यद्वा धर्मः प्रकर्षेण नाशितः अधर्मश्च सम्यक् स्थापित इति श्लेषपक्षे कथं केन प्रकारेण
चरन् उपितुनके नापीत्यर्थः कुतः भक्तिलक्षणधर्मसेतूनां वक्तृत्वादिहेतोरित्यर्थः अतो निजावतारसुखप्रयोज
नमौभाक्तिविशेषप्रचारणाय धर्माघनादरोयस्कृत एवेति भावः सचतावत्कर्माणि कुर्वीतेत्यादिवचनात् तत्सेवके ।।।

वापि वक्ता एव यः स्वदत्तसिद्धधर्ममर्यादानांवक्तादिरपि किमर्थंप्रातिकूल्यमाचरत् रासक्रीडया परमभक्तिप्रवर्तनेन तदेक
साधकेधर्मस्यापिसफलसार्थमितिभावः किंच पराणांतदेकभक्तयाश्रेष्ठानांदाराणांस्वस्त्रीणांइवाभिमर्शनं प्रेमार्थंमत्वा
र्थमितिभावः किंच पराणांतदेकभक्तयाश्रेष्ठानांदाराणांस्वस्त्रीणांइवाभिमर्शनं प्रेमार्थमवतीर्णस्यसर्वोपेक्षयाप्र
यजनमनोरथपूरणंयुक्तमेवेति यदुपतिधर्मपरयदुवंशेऽवतीर्णत्वादपितथाकर्तुंनार्हतीतिभावः तेप्रसिद्धा ए तमि
तिकुत्राप्यन्यः संशयोनास्तीत्यर्थः नइतिवरुत्वंसंदेहविवर्गाभिप्रायेण संशयमिति आप्तशिरोमुकुटमणेस्तस्यकृतेदो
षबुद्धिर्नास्त्येव किंतुशास्त्रविरुद्धत्वेनतत्रास्माकंदाढर्याभावाच्चित्तदोलनंस्यादित्यर्थः सुव्रतः हेब्रह्मचर्यादिनिष्ठइतिभवा
दृशामाचरितविरुद्धं तत्जुगुप्सितमिवेति यद्वा हेसदाचारनिष्ठेति अन्यथाभवदादिसंमतसदाचारलोपइतिभावः
श्लेषपदेयदूनांभक्तानांपतिरितिभक्तवात्सल्येनधर्मातिक्रमार्होपिइत्यर्थः जुगुप्सितंकिंकृतवान् अपितुनैव किंतु
भक्तवर्गसंमतमेवाकरोदित्यर्थः कुतः आप्तः लब्धः कामः रासक्रीडादिना निजप्रेमभक्तिविस्तारणमनोरथोयेन
सः सर्वसाधकतमप्रेमभक्तिप्रवर्त्तनेननिंदितानाचरणात् वस्तुततेनसाधकवर्गसंतोषणादेवेत्यर्थः तथापिनःसंशयं
प्रायइतितत्रकेषांचित्शास्त्रार्थतत्त्वविदांभक्तिपरायणांतद्रसाभिज्ञिकानांप्रेमभक्तिरसमयतदीयरासक्रीडा
दोषसंशयाभावात् यद्वा प्रायेणनशानसमयेऽस्मिन्इतिसंशयस्यायोग्यतोक्ता अतः शीघ्रंतच्छेदनमभिप्रेतंनः
तिस्वीयत्वेनविपक्षाणामपि ग्रहणं सहजविनयादिना किंवावाक्चातुर्येणविपक्षतादिबोधनार्थमेव अतोदुर्बु

कानामेवात्रत्यानांकेषांचित् हितार्थमेवमयापृछ्यते नचनिजसंदेहादितिभावः ततः अभिअभयंयथास्यात्तेभ्योभयमहू
तानेषांसंशयशंख्वलांछिंधीत्यर्थः सुव्रताहेभक्तेकनिष्ठ सहजकृपालुतयाशिष्यस्नेहापेक्षयावापरिहरतिधर्मेतिसप्तभिः ईश्वरा
११४ णांज्ञानेभक्तौचसामर्थ्यवतांभगवज्जनार्दनाकर्मादिपारतंत्र्यरहितानामित्यर्थः धर्मस्यव्यतिक्रमविशेषेणोल्लंघनं यथा
ब्रह्मादीनांदुहितृकामनादि साहसंनिर्भयता यथाइंद्रादीनांसर्वभुक्तेभक्षयतिदहतीतिवातथातस्यसर्वभोजनेनापिय
थाग्नेरमेध्यादिभक्षणेजन्यदोषोवधादिदोषोवानस्यात्तद्वदित्यर्थः अन्यत्तैर्व्याख्यातं यद्वाधर्मव्यतिक्रमएवसाहसं
एतदीश्वराचरितंसाहसं नसम्यगाचरेत् सम्यगित्यस्यनिषेधेतात्पर्यं जातुकदाचिदपि तत्रचमनसापि किमुतवाचा
कर्मणावतर्हिहेतौनिश्चयेवा विशेषेणसमूलतयालोकद्वयदुःखित्वादिप्रकारेणनश्यति मौढ्यात् ईश्वराणामैश्वर्यं
आत्मनश्चासामर्थ्यमज्ञात्वेत्यर्थः इतिभक्षणेमौढ्यमेव हेतुरुक्तः अन्यथाभक्षणेप्रवृत्तिः अब्धिजंकालकूटं इतिपरमतीक्ष्णं
तयासद्यएवविनाशेभिप्रेतः ईश्वरस्तुननश्यदेव प्रत्युतऐश्वर्यविशेषप्रकाशादिनाशोभतएव यथानीलकंठत्वादिना
श्रीमहादेवइतिभावः स्वकीयेनवचसायुक्तमितिस्वशब्देनकदाचित्स्वेममपारवश्येनाविचारादुच्यमानमाचारविसंवादिव
चोव्यवर्त्तितं बुद्धिमानितितत्तद्धिवीर्येत्यर्थः अन्यथानिर्बुद्धिरेवेतिभावः कुशलंप्रएयंतस्याचरितेनानुष्ठानेनएषा
मीश्वराणां चकारादमुत्रापित्यर्थः फलं विपर्ययेणपापेनवाशब्दः समुच्चये अनर्थोपिनास्ति कुतः निरहंकारि
णां अहंकाराद्व्यतिरिक्तानांअहंकारा... ...प्रभो हेवोढुंसमर्थ एतन्नयासम्य बुध्यत ११२

एवेत्यर्थः यद्वा तस्यापीत्य। वेषाभिप्रायेण संबोधयति हे ईश्वरेति अहो यद्येवं तेषामपि निरहंकारितामात्रेणैवानर्थाभावस्तर्हि सर्वजीव नाधिभव
तीर्णस्य परमेश्वरस्य दुःखार्थेशं कापीति कैमुतिकन्यायेन द्रढयन्नाह किमुत इति अखिलसत्वानां सर्वजीवानां तिर्यगादयः कामेण नामसराज
ससात्त्विकाः ईशितव्यानां स्वभावत एव नियम्यानां इति मुक्तानामपि तदधीनता सूचिता कुशलाकुशले पुण्यपापे तान्यामन्वयः संप
र्कः सर्वनियंतृत्वेन नियामकाभावात् परमस्वतंत्रत्वाच्च एतदेव हि परमेश्वरत्वमामेति भावः अन्यत्तैर्व्याख्यातं यद्वा ईशितव्यानां च
तद्भक्तानां किमुतेति परागेति अत्तिनम्रत्वेन सेवया भक्तिविशेषोदर्शितः नितरां सेवेति निशब्दः स्वभावत एव तेषां सेवास्तत्र अभिप्रा
येण यद्वा परागेति दूरसेवाभिधेत्ता निशब्देन च स्वस्वभावसेवा अभिहिता तथापि तन्माहात्म्ये न दृष्टाः निर्भयत्वादिदर्पयुक्ताः अत एव स्वैरं च
रंति विधिनिषेधानादरेण स्वेच्छयैव कृत्यानि कुर्वते अतो न नह्यमानाः तैरचह्यमानाः तत्रानासक्ताः त्व प्राइति पाठे सर्वत्र संतुष्टाः अन
न्यापेक्षा इत्यर्थः किंच योगेष्वंगाः समाधिर्ज्ञानं वा तत्प्रभावेन शान्त्या विशेषेण धूतः छिन्नः कर्मभिरनंतकोटिजन्मार्जितैर्बंधः बंधनं तद्रू
पो वा बंधो येस्ते मुनयोपि अपि शब्देन भक्तेभ्यो मुनीनां न्यूनतोक्ता अनेनैव श्लोकस्याभिप्रायेण दृष्टा इत्युक्तं इच्छया स्वच्छंदेनैव आत्तप्रकृति
तं वपुर्येन तस्येति परमस्वातंत्र्यं दर्शितं यद्वा निजप्रेमभक्तिविस्तारणेच्छया ततश्च तदपेक्षया विधिनिषेधानादरो युक्त एवेति भावः
यद्वा भक्तानां इच्छया आत्तानि वपूंषि मत्स्यकूर्मादिमूर्तयो येन तिरोवितारित्वेन परमैश्वर्यमुक्तं अतः कुत एव बंधः अपि तु न कथम
पि स्यादित्यर्थः अन्यत्तैर्व्याख्यातं यद्वा योगो भक्तियोगस्तैः मुनयोपि किमुत प्रथमत एव भक्तिसंमत इत्यर्थः अप्यर्थे चकारः किंच
क्तव्यं पृथक्त्वेन तेषां तासां चेति सर्वेषामपि तत्र संप्रायनिरासार्थमेव शब्दः इत्यनेनास्यान्वयः स एवैषसाक्षात्कृतः अध्यदृष्टिनितदं
शत्वेन तत्स्थैर्यत्वेन वा तत्त्वविचारतस्तास्मिन्नेव भोक्तृत्वपर्यवसानात् किंवा अंतर्यामित्वेनापि मायावादिना मद्वैतव्याख्यानुसा
रेण च परदारत्वाभावात् परदारसेवा नास्तीति परिहृतं अत एव परमात्मत्वसिद्ध्ये सर्वेषामित्युक्तं एषः श्रीगोपीरमणः क्री

डनेनलीलया किंवाक्रीडनेनहेतुनाक्रीडार्थमित्यर्थः देहभाक् निजश्रीमूर्त्तिप्रकटकः अन्यत्तेर्व्याख्यातं यद्वा अध्यद‍ः सर्वचिन्ता
धिवात्तासर्वेंद्रिप्रवर्त्तकश्चेत्यर्थः अतएवांतश्चरति एवमंतर्यामितयासर्वकर्मसुसर्वप्रवर्त्तनेनापियथातस्यतद्गुणदोषैर्लेपो
113 नास्यात् किंवासर्वकर्मस्वंतर्यामिद्दष्टाप्रवृत्तेरन्येषामपितैर्लेपोयथानस्यात्तथात्रापीतिभावः इतिपरमैश्वर्येणपूर्वोक्तवंधा
भावहेतुरभिव्यंजितः विशेषतश्चरासक्रीडार्थमेवदेहभाक्प्रकटितत्तद्योग्यश्रीव्रजेंद्रकिशोरमूर्त्तिरित्यर्थः प्रेमरसविस्तार
णार्थंमवतीर्णस्यतदनुरूपएवव्यवहारोयुक्तोनामेतिसिद्धांततत्वं एतदेवप्रपंचयिष्यति अनुग्रहायइति यद्वा अध्यद‍ः प्रस
न्नः सन्क्रीडनायतत्क्रीडार्थंदेहः अवतारोयेषांगोपीजनानांव्रजजनानांवातान्भजतिरमयतीतितथास‍ः अतस्तेषामंतर्वहि
श्चतत् क्रीडासाधनत्वात्तन्नतस्यक्रीडयाकस्यापिकोपिदोषः प्रसज्जेदितिभावः भक्तानामनुग्रहायभक्तानांविनोदार्थंकरो
मिविधाः कृपाइत्यादिश्रीभगवद्वचनात् मानुषंनराकारंआश्रितः प्रकटितवान्सन् यद्वाप्रकटयामासेतिवाक्यसमाप्तिः इतिभ
क्तानुग्रहार्थंतत्क्रीडेत्यभिप्रेतं तत्रभक्तशब्देनश्रीव्रजदेव्योव्रजजनाश्चसर्वे तथाकालत्रयसंबंधिनश्चान्येचवेदितव्याः यद्वाभ
क्तानांमुख्याः श्रीव्रजदेव्यः एवोक्ताः तथापिमुख्यानामनुग्रहोन्येषामपिसर्वेषामनुग्रहः सिद्धएव अतएवक्रीडाभजते
प्रीत्यासंपादयतीत्यर्थः शेषणभजते अनुसरतिप्रकाशयतिवतिक्रीडानांनित्यसिद्धत्वसूचितं तेनसर्वदोषः स्वतएवान
स्तः तादृशीः अनिर्वचनीयाः सर्वचित्ताकर्षिणीरित्यर्थः श्लेषेणराजसदृशाक्रीडाश्रवणेनापितत्परोभवेत् किमुतरा ११२
सक्रीडांकृत्येत्यर्थः वशब्देनभगवान्क्रीडावा सर्वोपिजनोभवेत् यद्वामानुषंदेहमाश्रितैतः सर्वोपितु [illegible] [illegible]रोभवेत्

१२

मर्त्यलोके श्रीभगवद्देवतासु तेषां भजनेन मुख्यत्वात् मनुष्याणामेव सुखं तच्छ्रवणादिसिद्धेः भूतानामिति पाठे सर्वेषामेव जनानां विषयिणामेवं भक्ता
नां चेत्यर्थः इति परमकारुणिकत्वमुक्तं एवं सकथं धर्मसेतूनामित्यनेन धर्मविरुद्धं कथं कृतवानित्येकस्य प्रश्नस्य परिहारः धर्मव्यतिक्रम इत्यादिभिः तथैवा आ
प्तकाम इत्यनेन परिपूर्णस्य कान्तरसस्पृहेति द्वितीयस्य अनुग्रहायेत्यनेनेति विवेचनीयं तासु गूढवारणमतिक्रम्यगतास्वपि कृष्णं प्रत्यसूयां न च
क्रुः कुतस्तस्य मायया शक्तिविशेषेण मोहिताः यतो व्रजौकसः तल्लीलापरिकरा इत्यर्थः अत एव गतानपि तान् स्वस्वपार्श्वस्थाने
व मन्यमाना बभूवुः यद्वा दारान् प्रति च नासूयन् कुतः स्वपार्श्वस्थान् मन्यमानाः तत्र च तावार्यमाणा इत्यनेन निजवाक्यमतिक्रम्य
साक्षात्कृतानामपि तासां तैः स्वपार्श्वस्थत्वमननं पुनर्निवृत्त्यागमनस्य मननादिति ज्ञेयं यद्वा भक्तानामनुग्रहायेत्युक्तं तत्र गोपानां दा
राकर्षणेन तस्मै तेषामसूयासंभवान् एतेषु कथमनुग्रहः सिद्ध इत्याशंक्य तत्रोत्तरं वदन् प्रकृतं चानुसरन्नेनेति अर्थः स एव वासु
देवेन चित्ताधिष्ठात्रा तेनैव अनुमोदिता अतः प्रेरिता अपि यद्वा वसुषु अथ सु दीव्यतीति वसुदेवो वसुप्रवरो ज्ञोण रूपः श्रीनंद एव तत्सु
तो वासुदेवस्तेन भगवत्ताप्रकटनपरेण श्रीकृष्णेन व्रजमंगलार्थमनुज्ञाताः किंवा अनुनिरंतरं मोदिता हर्षिताः अत एवानिच्छंत्यः
तथापि स्वगृहान् ययुः कुतः भगवत्प्रियाः तत्प्रीतिमालोच्येत्यर्थः अन्यथा तातमातृवयस्यवर्गसंतोषणगोपालनादेस्तथा
पूर्ववद्रासक्रीडासुखस्य चासंपत्तिः व्रजे यावध्वः नवोढा इव नववयुवत्यः यद्वा रासक्रीडया तत्पत्नीत्वमिव प्राप्तास्ताभिः इदं रास
क्रीडालक्षणं विशिष्टं क्रीडितं चकारादीदृशमन्यदपि विष्णोरिति तासां मध्ये द्वयोर्द्वयोरित्याद्युक्तव्यापकत्वाभिप्रायेण श्रद्धा
न्वित इति अन्यथा रसानुदयेन परमभक्त्या संपन्नः श्रद्धान्वितत्वादेव अनुनिरंतरं शृणुयात् एतत्कृत्येव यद्वानुनिश्चितं अथ श्रवण

११४ नेत्तरं श्रवणान्वितत्वात् किं वा अनुक्तसमुच्चये स्मरेच्च प्रत्येकं सर्वेषां परमभक्तसाधनत्वात् तथापि श्रवणादित्रयस्यास्य यथोक्तरं
तत्र श्रेष्ठत्वं यद्वत्यधिकारित्वापेक्षा निरस्ता परंपरं मांप्रेमलक्षणां प्रतिदत्तां नूतनत्वेन लब्ध्वा हृद्रोगरूपं काममिति भगवद्विषयकः
कामविशेषोव्यवच्छिन्नः तस्य परमामृतत्वेन तद्वैपरीत्यान् धीरः सर्वार्थतत्त्ववेत्ता अपुनः कामादिस्त्काभिताविन्नेवा हृद्रोगादि
कमेतत्परमभक्तेरेवानुषंगिकं फलं तस्या एवमुख्यफलत्वात् तत्क्रीडाश्रवणादिनाप्येतत्स्यात् किं च क्रव्यं भौतिकं निंद्य
कामक्रीडावत् तस्य सा क्रीडेति प्रसंगानुसारेणात्तात्पर्यैकल्यं अतस्तेस्य तासां च स कामविशेषः प्रेमपरिपाकविलासवि
शेषरूप एव इति लिखितमेव विवृतं च श्रीभागवतामृते अन्यत्रैव्याख्यातं यद्वाधीरः विचारयन् सन्निःस्पर्धः कामं यथेष्टं
त्वमामुभक्तिं प्रतिलभ्य हृद्रोगमाध्यं श्रीकृष्णप्राप्त्यादिकृतमचिरेणापहिनोति तत्प्राप्तेरिति भावः अन्यत्समानं क्रीडा
तावद्विरंतश्च व्रजडोयं येन नृत्यते तस्य चैतत्स्वरूपस्य प्रीत्यै भगवतोस्त्विदं इति श्रीदशमे त्रयस्त्रिंशः श्रीगोपीजनवल्लभाय नमः

रा

दपी

रा ११४

३०